अथआचारार्कप्रारंभः

श्रीगणेशायनमः॥ ॥ॐ॥जानकीनयनयुग्मगोचरंमानिनांनयनयोरगोचरं॥ नीलमेघरुचिरच्छविंसदाभावयेमनसिराघवंप्रभुं॥१॥ उर्ध्वे
पूर्णाशुरवचंद्रबिंबपरामृशंतंनिजपाणिपल्लवैः॥ गंगाधरंनौमिभुजंगराहुप्रकृष्टभीत्याचकितंमुहुर्मुहुः॥२॥ महादेवतनूजन्माभारद्वाजकुलो
द्भवः॥ दिवाकरोरकिंनलाख्याचारार्कंतनोत्यसौ ॥३॥तत्रादावुपोद्घातप्रकरणमारभ्यते ॥हारीतः॥ अज्ञानतमसांधानांभ्रामितानांकुदृ-
ष्टिभिः॥धर्मशास्त्रप्रदीपोयंधार्योमार्गोपदेशकः॥ मनुः॥ आचारःपरमोधर्मोनृणांश्रेयस्करोभवेत्॥इहलोकेपराकीर्तिःपरत्रपरमंसुखं
॥आचारात्प्राप्यतेश्रैष्ठ्यमाचारात्कर्मलभ्यते॥कर्मणाजायतेज्ञानंज्ञानान्मोक्षमवाप्यते॥पराशरः॥आचारःपरमोधर्मआचारःपरमंतपः
॥आचारःपरमंज्ञानमाचारात्किंनसाध्यते॥यस्त्वाचारविहीनोपिविद्वान्वेदपरायणः॥सर्वधर्मबहिःकार्योयथाशूद्रस्तथैवसः॥स्मृत्यंतरेलौ-
किकाचारोप्यावश्यकत्वेनोक्तः॥ किंपुनःशास्त्रीयः॥ तथा॥यद्यपिस्यात्स्वयंब्रह्मात्रैलोक्याकर्षणक्षमः॥ तथापिलौकिकाचारंमनसा
पिनलंघयेत्॥ तथा॥समयाचारिकोधर्मोजातिदेशकुलोद्भवः॥ ग्रामाचाराःपरिग्राह्याःसर्वत्रैवयथोदितं॥धर्ममूलमाहयाज्ञवल्क्यः
॥श्रुतिःस्मृतिःसदाचारःस्वस्यचप्रियमात्मनः॥सम्यक्संकल्पजःकामोधर्ममूलमिदंस्मृतमितिपद्मपुराणेपि॥बहुत्वादिहशास्त्राणांध
र्ममूलंश्रुतिःस्मृतिः॥श्रुतिस्मृतिपुराणानांविरोधोयदिदृश्यते॥श्रौतंतत्रप्रमाणंस्याद्द्वयोर्द्वैधेस्मृतिर्वरा॥श्रुतिद्वैधंतुयत्रस्यात्तत्रधर्मावुभौ
स्मृतौ॥स्मृतिद्वैधेतुविषयःकल्पनीयःपृथक्पृथक्॥वेदप्रणिहितोधर्मोह्यधर्मस्तद्विपर्ययः॥वेदोनारायणःसाक्षात्स्वयंभूरितिशुश्रुम॥

१

॥ योवैदिकमनादृत्य कर्मस्मार्तैतिहासिकं ॥ मोहात्समाचरेद्विप्रोनसपुण्येनलिप्यतइति ॥ धर्मलक्षणमाहशंखः ॥ देशकालउपायेनद्रव्यंश्रद्धास
मन्वितं ॥ पात्रेप्रदीयतेयत्तत्सकलंधर्मलक्षणं ॥ हेमाद्रौविष्णुधर्मोत्तरेपि ॥ गंगास्नानंशिवोदेवोभियपूजात्मचिंतनं ॥ ध्यानंनारायणस्यैवस
कलंधर्मलक्षणमिति ॥ तत्रैवबृहस्पतिः ॥ दयाक्षमानसूयाचशौचानायासमंगलं ॥ अकार्पण्यमस्पृहत्वंसर्वसा धारणानिच ॥ सर्वेषांब्र
राजन्यविट्शूद्राणांधर्मलक्षणानीत्यर्थः ॥ दयादीनांलक्षणमाह ॥ सएव ॥ परेवाबंधुवर्गेवामित्रेद्वेष्टरिवासदा ॥ आपन्नेरक्षितव्यंतुदयैषा
परिकीर्तिता ॥ बाह्येवाभ्यंतरेवापिदुःखउत्पादितेपरैः ॥ नकुप्यतिनवाहंतिसाक्षमापरिकीर्तिता ॥ गुणान्गुणिनोहंतिस्तौतिमंदगुणान
पि ॥ नान्यदोषेषुरमतेसानसूयाप्रकीर्तिता ॥ अभक्ष्यपरिहारश्चसंसर्गश्चाप्यनिंदितैः स्वधर्मेचव्यवस्थानंशौचमेतत्प्रकीर्तितं ॥ शरीरंपी
ड्यतेयेनसुशुभेनापिकर्मणा ॥ अत्यंतंतन्नकुर्वीतअनायासःसउच्यते ॥ प्रशस्ताचरणंनित्यमप्रशस्तविवर्जनं ॥ एतद्धिमंगलंप्रोक्तंऋ
षिभिस्तत्वदर्शिभिः ॥ स्तोकादपिप्रदातव्यमदीनेनांतरात्मना ॥ अहन्यहनियत्किंचिदकार्पण्यंहितत्स्मृतं ॥ यथोत्पन्नेनसंतोषः कर्तव्योह्य
ल्पवस्तुनि ॥ परस्यचिंतयेन्नार्थंसास्पृहापरिकीर्तितेति ॥ कर्मकरणेदिङ्नियमउक्तः कर्मप्रदीपेकात्यायनेन ॥ यत्रदिङ्नियमोनास्तिजप
होमादिकर्मसु ॥ तिस्रस्तत्रदिशः प्रोक्ताऐंद्रीसौम्यापराजिता ॥ गौतमः ॥ रात्रावुदङ्मुखःकुर्याद्दैवकार्यंसदैवहि ॥ शिवार्चनंसदाप्ये
वंमुनिःकुर्यादुदङ्मुखः ॥ सदारात्रौदिवाचेतिव्याख्यातंगुरुभिःक्वचित् ॥ विष्णुः दिङ्नियमाभावेप्राचीमनुरुध्यकर्मकुर्यात् ॥ प्राच्यु

काचारमयूखेतत्रांतरे ॥ यत्रैव भानुस्तु वियत्युदेति भावीतु तां वेदविदो वदंति ॥ ततोपरां पूर्वकपूज्ययोश्च सदागमज्ञाः प्रवदंति तां तु ॥ द्वितीया
त्यागमोक्तपूजायामेवेति तत्रैवोक्तं ॥ कात्यायनः ॥ यत्रोपदिश्यते कर्म कर्तुरंगं न तूच्यते ॥ दक्षिणस्तत्र विज्ञेयः कर्मणां पारगः करः ॥ आश्व
लायनसूत्रं च ॥ दक्षिणं प्रतीयादनादेशाइति ॥ वराहपुराणे ॥ स्नानपूजातर्पणादिजपहोमसुरार्चनं ॥ उपवासव्रताकार्यं सायंसंध्याहुती
विना ॥ चतुर्विंशतिमते ॥ इक्षूनपः फलं मूलं पयस्तांबूलमौषधं भक्षयित्वापि कर्तव्याः स्नानदानादिकाः क्रियाः ॥ कर्मप्रदीपे ॥ पित्र्यमं
त्रानुद्रवणे आत्मालंभेधमेक्षणे ॥ अधोवायुसमुत्सर्गे प्रहासेनृतभाषणे ॥ मार्जारमूषकस्पर्शे आक्रुष्टे क्रोधसंभवे ॥ निमित्तेष्वेषु सर्वत्र क-
र्म कुर्वन्नपः स्पृशेत् ॥ आत्मालंभोत्हृदयस्पर्शः ॥ हारीतः ॥ आर्द्रवासा जले कुर्यात्तर्पणाचमनं जपं ॥ शुष्कवासाः स्थले कुर्यात्तर्पणाचमनं जपं ॥
आपस्तंबः ॥ संध्यार्थे भोजनार्थे वा स्नानार्थे पितृकर्मणि ॥ शूद्रात्हृतेन नाचामेद्यागादिहवनेषु च ॥ यमः ॥ आपः करनखस्पृष्टाः समान
मतियो द्विजः ॥ सुरां पिबति सुव्यक्तं यमस्य वचनं यथा ॥ बौधायनः ॥ शुध्द्याभावे भवेत्किंचिद्भूमौ स्युस्त्वाप्तु तज्जलं ॥ योगयाज्ञवल्क्यः ॥
आर्षं छंदश्च दैवत्यं विनियोगं तथैव च ॥ वेदितव्यं प्रयत्नेन ब्राह्मणेन विशेषतः ॥ छंदोगपरिशिष्टे ॥ आसीन ऊर्ध्वः प्रह्वो वा नियमो यत्र नेद्
शः ॥ तदासीनेन कर्तव्यं न प्रह्वेन न तिष्ठता ॥ सदोपवीतिना भाव्यं सदा बद्धशिखेन च ॥ विशिखो व्युपवीतश्च यत्करोति न तत्कृतं ॥ नचाचो
त्तरार्धेन यज्ञोपवीतस्य कर्मांगतोक्तेः कर्मकालातिरिक्तकाले यज्ञोपवीतधारणमैच्छिकमिति वाच्यं ॥ मलापकर्षणस्नाने गात्राभ्यंगे तथैव

त्व॥उपवीतंपृथक्कुर्यादन्यत्रनरकंव्रजेत् इत्याश्वलायनोक्तेः॥मंत्रन्यस्तोपवीतंयद्विनाभ्यंगंनचोद्धरेत्॥त्रुटितंवायदिभ्रष्टंपुनर्मंत्रेणधा-
रयेत्॥नवीनंधारयेद्विप्रोनजीर्णनपरैर्धृतमितिहारीतोक्तेश्च॥अथात्रप्रसंगाद्यज्ञोपवीतनिष्पत्तिप्रकारंप्रवदामः॥प्रयोगपारिजातेवि
ष्णुः॥कार्पासक्षौमगोवालशणवल्कतृणादिकं॥यथासंभवतोधार्यमुपवीतंद्विजातिभिः॥शुचौदेशेशुचिःसूत्रंसंहतांगुलिमूलके॥आवेष्ट्य
षण्णवत्यानंत्रिगुणीकृत्ययत्नतः अब्लिंगकैस्त्रिभिर्मंत्रैस्तत्प्रक्षाल्योर्ध्ववृतंतंकृतं॥पुनस्तंत्रिगुणीकृत्यनवसूत्रमधोवृतं॥अप्रदक्षिणमावृत्तं
सावित्र्यात्रिगुणीकृतं॥ वसिष्ठः॥ त्रिरावेष्ट्यदृढंकृत्वाहरिब्रह्मेश्वरान्नमेत्॥एवंकृत्वोपवीतंस्यात्तस्यैकाग्रंथिरिष्यते॥देवलः॥ ग्रंथेश्चनव
सूत्रस्यवक्ष्यंतेदेवताःक्रमात्॥ॐकारोग्निस्तथानागःसोमःपितृप्रजापती॥वायुःसूर्यश्चशर्वश्चइत्येतानवतंतवः॥रुद्रेणदीयतेग्रंथिःसा
वित्र्याचाभिमंत्रितं॥ तस्यार्यमुपवीतंस्यान्नातिलंबंनचोच्छ्रितं॥सावित्र्यादशकृत्वोद्भिर्मंत्रिताभिस्तदुक्षयेत्॥ब्रह्मचारिणएकंस्यात्स्नातके
द्वेबहूनिवा॥यज्ञोपवीतंपरमामितिमंत्रेणधारयेत्॥बहूनांधारणेतत्रप्रत्येकंमंत्रइष्यते॥भृगुः॥ब्रह्मसूत्रंचसव्येसेस्थितेयज्ञोपवीतिता
॥प्राचीनावीतितासव्येकंठस्थेतुनिवीतिता॥मनुः॥मेखलामजिनंदंडमुपवीतंकमंडलुं॥अप्सुप्रास्यविनष्टानि गृहीत्वान्यानिमंत्रवत्इ-
ति॥ इतिभारद्वाजमहादेव भट्टात्मजदिवाकरकृते आचारार्केउपोद्घातप्रकरणं॥ कृपासुकर्मपुंडरीकायताक्षेरमेनित्यंभूमिजाप्राणनाथे॥सं
साराब्धिंदूरपारंप्रतर्तुंभक्ष्यानोकामारुरुक्षोःप्रणामाः॥ १॥ आश्वलायनः॥ अथोच्यंतेगृहस्थस्यनित्यकर्मयथाविधि॥यत्कृत्वानृण्या-

माप्नोतिदैवात्पित्र्याच्चमानुषात् ॥ अथात्रब्राह्ममुहूर्तमारभ्यास्वापंकर्माण्युच्यंते ॥ ब्राह्ममुहूर्तश्चद्वेधाअंत्ययामात्मकोरात्रेरुपांत्यमुहूर्तश्च तत्राद्यः पितामहेनोक्तः रात्रेस्तुपश्चिमोयामोमुहूर्तोब्राह्मउच्यते ॥ द्वितीयस्तुप्रयोगपारिजातेरात्रिगतमुहूर्तपंचदश कंप्रक्रम्यब्राह्मो नासत्यतश्चैवमुहूर्त प्रक्रमोनिशीति ॥ मनुः ॥ ब्राह्मेमुहूर्तेबुध्येतधर्मार्थावनुचिंतयेत् ॥ कायक्लेशांश्चतन्मूलान्वेदतत्त्वार्थमेवच ॥ आगमे ॥ ब्राह्मेमुहूर्तेचोत्थायचिंतयेद्रघुनंदनं ॥ श्रीपूर्वजयमध्येस्थंद्विजयांतंविचक्षणइत्यादिप्रातःस्मरणंपितामहोक्तं ब्राह्ममुहूर्तमारभ्यकार्यमितिकेचित् ॥ श्रीमातामहचरणास्तु द्वितीयब्राह्ममुहूर्तमारभ्यप्रातःस्मरणंकार्यं ॥ पितामहोक्तस्तु ॥ वेदाभ्यासार्थमित्याहुः गुरुचरणैस्तु ॥ रात्रेरंतिमयामेतुद्विजोवेदंविचिंतयेत् ॥ इतिपरशुरामनिबंधेकात्यायनोक्तेः ॥ अत्रस्वापेप्रायश्चित्तमुक्तंस्मृतिरत्नावल्यां ॥ ब्राह्मेमुहूर्तेयानिद्रासापुण्यक्षयकारिणी ॥ तांकरोतिद्विजोमोहात्पादकृच्छ्रेणशुध्यतीति ॥ अत्रस्मरणीयमाहव्यासः ॥ महर्षिर्भगवान्व्यासःकृत्वेमांसंहितांपुरा ॥ श्लोकैश्चतुर्भिर्धर्मात्मापुत्रमध्यापयच्छुकं ॥ मातापितृसहस्राणिपुत्रदारशतानिच ॥ संसारेष्वनुभूतानियांतियास्यंतिचापरे ॥ हर्षस्थानसहस्राणिभयस्थानशतानिच ॥ दिवसेदिवसेमूढमाविशंतिनपंडितं ॥ ऊर्ध्वबाहुर्विरौम्येषनचकश्चिच्छृणोतिमे ॥ धर्मादर्थश्चकामश्चसकिमर्थंनसेव्यते ॥ नजातुकामान्नभयान्नलोभाद्धर्मंत्यजेज्जीवितस्यापिहेतोः ॥ धर्मोनित्यःसुखदुःखेत्वनित्येजीवोनित्योहेतुरस्यत्वनित्यः इमांभारतसावित्रींप्रातरुत्थाययःपठेत् ॥ सभारतफलंप्राप्यपरंब्रह्माधिगच्छति-

धर्माणि प्रातःस्मरामिखलु तत्सवितुर्वरेण्यंरूपंहिमंडलमृचोथतनुर्यजूंषि ॥ सामानियस्य किरणाः प्रभवादिहेतुंब्रह्मा
हरात्मकमलक्ष्यमचिंत्यरूपं ॥१॥ प्रातर्नमामितरणिंतनुवाङ्मनोभिर्ब्रह्मेंद्रपूर्वकसुरैर्नुतमर्चितंच ॥वृष्टिप्रमोचनविनिग्रहहेतुभू
तंत्रैलोक्यपालनकरंत्रिगुणात्मकंच ॥ २॥ प्रातर्भजामिसवितारमनंतशक्तिंपापौघशत्रुभयरोगहरंपरंच ॥ तंसर्वलोककलनात्मककालमूर्तिं
गोकंठबंधनविमोचनमादिदेवं ॥ ३॥ श्लोकत्रयमिदंभानोःप्रातःप्रातःपठेत्तुयः ॥ ससर्वव्याधिनिर्मुक्तःपरंसुखमवाप्नुयात् ॥ ४॥ प्रातः
स्मरामिगणनाथमनाथबंधुंसिंदूरपूरपरिशोभितगंडयुग्मं ॥उद्दंडविघ्नपरिखंडनचंडदंडमाखंडलादिसुरनायकवृंदवंद्यं ॥ १॥ प्रातर्नमा
मिचतुराननवंद्यमानमिच्छानुकूलमखिलंचवरंददानं ॥ तंतुंदिलंद्विरसनाधिपयज्ञसूत्रंपुत्रं विलासचतुरंशिवयोःशिवाय ॥ २॥ प्रातर्भ
जाम्यभयदंखलुभक्तशोकदावानलंगणविभुंवरकुंजरास्यं ॥अज्ञानकाननविनाशनहव्यवाहमुत्साहवर्धनमहंसुतमीश्वरस्य ॥ ३॥ श्लोक
त्रयमिदंपुण्यंसदासाम्राज्यदायकं ॥ प्रातरुत्थायसततंयःपठेत्प्रयतःपुमान् ॥ ४॥ प्रातःस्मरामिशरदिंदुकरोज्ज्वलाभांसद्रत्नवन्मकरकुंडल
हारभूषां ॥ दिव्यायुधोर्जितसुनीलसहस्रहस्तांरक्तोत्पलाभचरणांभवतींपरेशां ॥ १॥ प्रातर्नमामिमहिषासुरचंडमुंडशुंभासुरप्रमुखदैत्य
विनाशदक्षां ॥ ब्रह्मेंद्ररुद्रमुनिमोहनशीललीलांचंडींसमस्तसुरमूर्तिमनेकरूपां ॥ २॥ प्रातर्भजामिभजतामभिलाषदात्रींधात्रींसमस्त
जगतांदुरितापहंत्रीं ॥ संसारबंधनविमोचनहेतुभूतांमायांपरांसमधिगम्यपरस्यविष्णोः ॥ ३॥ श्लोकत्रयमिदंदेव्याश्चंडिकायाःपठेन्न

रः॥ सर्वान्कामानवाप्नोतिविष्णुलोकेमहीयते॥ ४॥ प्रातःस्मरामिभवभीतिहरंसुरेशंगंगाधरंवृषभवाहनमंबिकेशं॥ खट्वांगशूलवरदाभय
हस्तमीशंसंसाररोगहरमौषधमद्वितीयं॥ १॥ प्रातर्नमामिगिरिशंगिरिजार्धदेहंसर्गस्थितिप्रलयकारणमादिदेवं॥ विश्वेश्वरंविजितविश्व
मनोभिरामंसंसार०॥ २॥ प्रातर्भजामिशिवमेकमनंतमाद्यंवेदांतवेद्यमनघंपुरुषंमहांतं॥ नामादिभेदरहितंषड्भावशून्यंसं०॥ ३॥ प्रातःस
मुत्थायशिवंविचिंत्यश्लोकत्रयंयेनुदिनंपठंतितेदुःखजालंबहुजन्मसंचितंहित्वापदंयांतितदेवशंभोः॥ ४॥ स्कांदे प्रातःस्मरामिभवभीति
महार्तिशांत्यैनारायणंगरुडवाहनमब्जनाभंग्राहाभिभूतवरवारणमुक्तिहेतुंचक्रायुधंतरुणवारिजपत्रनेत्रं॥ १॥ प्रातर्नमामिमनसावचसाच
मूर्ध्नापादारविंदयुगुलंपरमस्यपुंसः॥ नारायणस्यनरकार्णवतारणस्यपारायणप्रवणविप्रपरायणस्य॥ २॥ प्रातर्भजामिभजतामभयंकरंतं
प्राक्सर्वजन्मकृतपापभयापहत्यै॥ योग्राहवक्त्रपतितांघ्रिगजेंद्रघोरशोकप्रणाशमकरोद्धृतशंखचक्रः॥ ३॥ श्लोकत्रयमिदंपुण्यंप्रातःकाले
पठेत्तुयः॥ लोकत्रयगुरुस्तस्मैदद्यादात्मपदंहरिः॥ ४॥ प्रातःस्मरामिरघुनाथमुखारविंदंमंदस्मितंमधुरभाषिविशालभालं॥ कर्णावलं-
बिचलकुंडलशोभिगंडंकर्णांतदीर्घनयनंनयनाभिरामं॥ १॥ प्रातर्भजामिरघुनाथकरारविंदंरक्षोगणायभयदंवरदंनिजेभ्यः॥ यद्राजसं
सदिविभज्यमहेशचापंसीताकरग्रहणमंगलमापसद्यः॥ २॥ प्रातर्नमामिरघुनाथपदारविंदंपद्मांकुशादिशुभरेखिसुखावहंमे॥ योगींद्रमा
नसमधुव्रतसेव्यमानंशापापहंसपदिगौतमधर्मपत्न्याः॥ ३॥ प्रातर्वदामिवचसारघुनाथनामवाग्दोषहारिसकलंशमलंनिहंति॥ यत्पार्व-

तीस्त्वप तिनासहमोस्वकामाभीत्यासहस्त्रहरिनामसमंजजाप ॥ ४ ॥ प्रातः श्रयेश्रुतिनुतांरघुनाथमूर्त्तिनीलांबुदोत्पलसितेतररत्ननीलां ॥ अ
मुक्तमौक्तिकविशेषविभूषणाढ्यांध्येयांसमस्तमुनिभिर्निजमुक्तिहेतुं ॥ ५ ॥ यः श्लोकपंचकमिदंप्रयतः पठेननित्यंप्रभातसमयेपुरुषः प्रबु
द्धः ॥ श्रीरामकिंकरजनेषुसएवमुख्योभूत्वाप्रयातिहरिलोकमनन्यलभ्यं ॥ ६ ॥ ब्रह्मामुरारिस्त्रिपुरांतकारी भानुः शशी भूमिसुतोबुध
श्च ॥ गुरुश्चशुक्रः शनिराहुकेतवः कुर्वंतुसर्वेममसुप्रभातं ॥ १ ॥ भृगुर्वसिष्ठः क्रतुरंगिराश्चमनुः पुलस्त्यः पुलहश्चगोतमः ॥ रैभ्योम-
रीचिश्च्यवनश्चदक्षः कुर्वंतुसर्वेम ॥ २ ॥ सनत्कुमारः सनकः सनंदनः सनातनोप्यासुरिपिंगलोच ॥ सप्तस्वराः सप्तरसातलानिकुर्वं ० ॥ ३ ॥
सप्तार्णवाः सप्तकुलाचलाश्चसप्तर्षयोद्वीपवनानिसप्तः ॥ भूरादिकृत्वाभुवनानिसप्तकु० ॥ ४ ॥ पृथ्वीसगंधासरसास्तथापस्पर्शीचवायुर्ज्व
लितंचतेजः ॥ नभःसशब्दंमहतासहैवकुर्वंतुसर्वे० ॥ ५ ॥ इत्थंप्रभातेपरमंपवित्रंपठेत्स्मरेद्वाशृणुयाच्चतद्वत् ॥ दुःस्वप्ननाशस्त्विहसुप्रभा
तं भवेच्चनित्यंभगवत्प्रसादात् ॥ ६ ॥ पुण्यश्लोकोनलोरा जापुण्यश्लोकोजनार्दनः ॥ पुण्यश्लोकाचवैदेहीपुण्यश्लोकोयुधिष्ठिरः ॥ ७ ॥ अ
श्वत्थामाबलिर्व्यासोहनुमांश्चविभीषणः ॥ कृपः परशुरामश्चसप्तैतेचिरजीविनः ॥ सप्तैता नृसंस्मरेन्नित्यंमार्कंडेयंतथाष्टमं जीवेद्वर्षशतं
सोपिसर्वव्याधिविवर्जितः ॥ ९ ॥ अहल्याद्रौपदीसीतातारामंदोदरीतथा ॥ पंचकंनास्मरेन्नित्यंमहापातकनाशनं ॥ १० ॥ इत्यादिपुराण
मंत्रान्पठित्वा ॥ समुद्रवसनेदेविपर्वतस्तनमंडलेविष्णुपत्निनमस्तुभ्यंपादस्पर्शंक्षमस्वमे ॥ इतिप्रार्थ्योत्थायरविंगुरूंश्चनमस्कृत्यप्रातर

शिमितिसमर्चेसूक्तंपठेदित्यृग्विधाने॥ ततोमूत्रपुरीषोत्सर्गंकुर्यात्॥ तत्रादौमूलवाक्यानिलिख्यंते॥ पराशरः॥ ततः प्रातः समुत्थायकुर्याद्विण्मू
त्रमेवच॥ नैर्ऋत्यामिषुविक्षेपमतीत्याभ्यधिकंभुवइति॥ अंगिराः॥ उत्थायपश्चिमेरात्रेस्ततआचम्यचोदकं॥ अंतर्धायतृणैर्भूमिंशिरःप्रावृत्य
वाससा॥ अयज्ञियैरनार्द्रैश्चतृणैःसंछादयेन्मेदिनीं॥ कुर्यान्मूत्रपुरीषेतुशुचौदेशेसमाहितः॥ देवताऋषयःसर्वेपिशाचोरगराक्षसाः॥ इतोगच्छंतु
भूतानिबहिर्भूमिंकरोम्यहं॥ कृत्वायज्ञोपवीतंतुपृष्ठतः कंठलंबितं॥ विण्मूत्रंतुगृहीकुर्याद्यद्वाकर्णेसमाहितइति॥ अयंचव्यवस्थितविकल्पः॥ य
येकवस्त्रोयज्ञोपवीतंकर्णेकृत्वामूत्रपुरीषोत्सर्गंकुर्यादितिशांखायनोक्तेः॥ याज्ञवल्क्यः॥ दिवासंध्यासुकर्णस्थब्रह्मसूत्रउदङ्मुखः॥ कुर्यान्मू-
त्रपुरीषेतुरात्रौचेद्दक्षिणामुखः॥ कर्णोत्रदक्षिणः कर्त्रंगानामनुक्तौतुदक्षिणांगंभवेत्तदेतिस्मृत्यर्थसारेउक्तत्वात्॥ पवित्रेदक्षिणेकर्णेकृत्वावि
ण्मूत्रमुत्सृजेदितिलिंगाच्च॥ भरद्वाजः॥ अथापकृष्यविण्मूत्रंलोष्ठकाष्ठतृणादिना॥ याज्ञवल्क्यः॥ गृहीतशिश्नश्चोत्थायमृद्भिरभ्युद्धृतैर्ज
लैः॥ गंधलेपक्षयकरंशौचंकुर्यादतंद्रितः॥ यमः॥ आहरेन्मृत्तिकांविप्रः कूलात्ससिकतांतथा॥ विप्रेतुशुक्लागृह्यात्क्षत्रियोरक्तामेवविधीयते॥
हरिद्वर्णावैश्येतुशूद्रेकृष्णांतुनिर्दिशेत्॥ भृगुः॥ यस्मिन्देशेतुयत्तोयंयाचयत्रैवमृत्तिका॥ सैवतत्रप्रशस्तास्यात्तयाशौचंविधीयते॥ द्वेलिंगे
मूषिकेदेयेगुदेपंचकरेदश॥ उभयोःसप्तदातव्याविट्शौचेमृत्तिकाःस्मृताः॥ शौनकः॥ आर्द्रामलकमात्रास्तुमूत्रशौचेहिमृत्तिकाः॥ दक्षः॥
तिस्रोपानेदशैकस्मिन्नुभयोःसप्तमृत्तिकाः॥ विष्णुः॥ अर्धप्रसृतिमात्रातुप्रथमामृत्तिकास्मृता॥ द्वितीयाचतृतीयाचतदर्धाप्रकीर्ति-

ता ॥ वसिष्ठः ॥ एकालिंगेकरेतिस्रोउभयोर्द्वेतिमृद्द्वयं ॥ एकैकयामृदापादौप्रक्षाल्यतुशुचिर्भवेत् ॥ मूत्रशौचंसमाख्यातंशुक्रेतुद्विगुणंभवेत्
शंखः ॥ तिस्रस्तुपादयोर्देयाःशौचकामस्यनित्यशइति ॥ एतच्छौचंगृहस्थानांद्विगुणंब्रह्मचारिणां ॥ त्रिगुणंस्याद्वनस्थानांयतीनांस्याच्चतुर्गुणं-
पादशौचक्रमः स्मृत्यंतरे ॥ शौचार्थेवामपादे पूर्वंप्रक्षालनंभवेत् ॥ शौचेतुवामपूर्वं स्यादन्यत्रदक्षिणंसदाराज्यादौविशेषःस्मृत्यर्थसारे ॥ दिवाय-
द्विहितंशौचंतदर्धंनिशिकीर्तितं ॥ तदर्धमातुरेप्रोक्तमातुरस्यार्धमध्वनिस्त्रीशूद्रादरशक्तानांबालानांचोपवीतिनः ॥ गंधलेपक्षयकरंशौचंकुर्या
न्नसंख्यया ॥ आश्वलायनः ॥ लिंगशौचंपुराकृत्वागुदशौचंततःपरं ॥ देवलः ॥ धर्मविद्दक्षिणंहस्तमधःशौचेनयोजयेत् ॥ तथाचवामहस्ते
नंनाभेरूर्ध्वंनशोधयेत् ॥ ऋष्यशृंगः ॥ धाराशौचंनकर्तव्यंशौचशुद्धिमभीप्सता ॥ चुलकेनैवकर्तव्यंहस्तशुद्धिविधानतः ॥ मनुः ॥ यावन्नापैत्य-
मेध्याक्तोगंधोलेपश्चतत्कृतः ॥ तावन्मृद्वारिचादेयंसर्वासुद्रव्यशुद्धिषु ॥ अंगिराः ॥ संध्ययोरुभयोर्जाप्येभोजनेदंतधावने ॥ पितृकार्येचदैवेच
तथामूत्रपुरीषयोः ॥ गुरूणांसंनिधौदानेयोगेचैवविशेषतः ॥ एषुमौनंसदातिष्ठन्स्वर्गंप्राप्नोतिमानवः ॥ आपस्तंबः ॥ नचसोपानत्कोमूत्रपुरीषे
कुर्यादिति ॥ सारणीये ॥ गृहीत्वाजलपात्रंतुविण्मूत्रंकुरुतेयदि ॥ तज्जलंमूत्रसदृशंपीत्वाचांद्रायणंचरेत् ॥ मलमूत्रंत्यजेद्विप्रोविस्मृत्यैवो
पवीतधृक् उपवीतंतदुत्सृज्यगृह्यादन्यंनवंतदेति ॥ अंगिराः ॥ मूत्रोत्सर्गंद्विजःकृत्वानकुर्याच्छौचमात्मनः ॥ मोहाद्भुक्त्वात्रिरात्रेणजलंपीत्वा
त्रिरात्रेण शुध्यति ॥ उक्तशौचाकरणेप्रायश्चित्तंस्मृतिरत्नावल्यां गायत्र्यष्टशतंचैवप्राणायामत्रयंतथेतिजपेदितिशेषः ॥ बोधायनः ॥ देशंकाल

तथात्मानंद्रव्यंद्रव्य प्रयोजनं ॥ उपपत्तिमवस्थांचज्ञात्वाशौचंप्रकल्पयेत् ॥ व्यासः ॥ अपवित्रः पवित्रोवासर्वावस्थांगतोपिवा ॥ यः स्मरेत्पुंडरीकाक्षंसबाह्याभ्यंतरः शुचिः ॥ आश्वलायनः ॥ कुर्याद्द्वादशगंडूषान्पुरीषोत्सर्जनेततः ॥ मूत्रोत्सर्गेतुचतुरोभोजनांतेतुषोडश ॥ भक्ष्यभोज्यावसानेतुगंडूषाष्टकमाचरेत् ॥ गंडूषदेशः प्रयोगपारिजाते ॥ पुरतः सर्वदेवाश्चदक्षिणेपितरस्तथा ॥ ऋषयः पृष्ठतः सर्वेवामेगंडूषमाचरेत् ॥ अथप्रयोगः ॥ पूर्वोक्तब्राह्ममुहूर्तेउत्थायाचम्येष्टदेवतांनमस्कृत्यप्रातः स्मरणंविधायरविंगुरुंनमस्कृत्यग्रामाद्बहिर्नैरृत्याभिमुखंक्षेपात्ययेशुद्धमृत्तिकांससिकतांजलपात्रंचादायकीटादिरहितस्थलंगत्वामृज्जलपात्रेनिधायायज्ञियेरनार्द्रैस्तृणैर्भूमिमाच्छाद्यप्रावृतशिराः पृष्ठतः कंठलंबितयज्ञोपवीतोयद्येकवस्त्रश्चेद्दक्षिणकर्णनिहितयज्ञोपवीतोमौनीघ्राणास्येपिधायदिवोदङ्मुखोरात्रौदक्षिणामुखोमूत्रपुरीषेउत्सृज्यलोष्ठादिनागुदंपरिमृज्यगृहीतशिश्नउत्थायपूर्वगृहीतमृज्जलपात्रेगृहीत्वाद्रामलकमात्रमृज्जलैर्द्विवारंलिंगशौचंकृत्वार्धप्रसृतितदर्धार्धैर्मृज्जलैस्त्रिवारमपानंशोध्यपुनर्जलैरेवलिंगगुदेप्रक्षाल्यशुद्धमृत्तिकयैकवारंहस्तंप्रक्षाल्यशुद्धभूमिमागत्यान्यमृज्जलैर्दशवारंवामकरंप्रक्षाल्यततः करद्वयंसप्तवारंतावद्भिरेवमृज्जलैः प्रक्षाल्यवामदक्षिणपादौप्रत्येकंत्रिः प्रक्षाल्या न्यजलेनद्वादशगंडूषान्वामभागेकृत्वाजलपात्रंत्रिः प्रोक्ष्यजलबिंदून्जलेनिःक्षिप्योपवीतीद्विराचामेत् ॥ मूत्रमात्रोत्सर्गेतुपूर्ववदेकवारंलिंगंप्रक्षाल्यवामकरंत्रिः प्रक्षाल्यकरद्वयंद्विःप्रक्षाल्यैकैकयामृदापादौप्रक्षाल्यगंडूषचतुष्टयंविधायाचामेत् ॥ इतिशौचप्रकरणं ॥ अथाचमनं वृद्धपराशरः ॥ कृत्वाथशौचंप्रक्षाल्यहस्तौपादौच-

भृज्जलैः निबद्धशिखकच्छस्तु द्विज आचमनं चरेत् ॥ आचमननिमित्तान्याह हेमाद्रौ मनुः ॥ प्राणस्यायमनं कृत्वा आचमेत्प्रयतोऽपि सन् ॥ आं
तरं रिक्त्यते यस्मात्तस्मादाचमनं स्मृतं ॥ कृत्वा मूत्रं पुरीषं वा रवान्याचांत उपस्पृशेत् ॥ वेदमध्येष्यमाणश्चाप्यन्नमश्नंश्च सर्वदा ॥ रवानींद्रियाणि छि
द्राणि कौर्मे ॥ चंडालम्लेच्छसंभाषे स्त्रीशूद्रोच्छिष्टभाषणे ॥ उच्छिष्टपुरुषं स्पृष्ट्वा भोज्यं चापि तथाविधं ॥ आचमेदश्रुपाते च लोहितस्य तथैव च
मः ॥ उत्तीर्योदकमाचम्य अवतीर्य तथैव च ॥ एवं स्यात्तेजसा युक्तो वरुणेनापि पूजितः ॥ मार्कंडेयपुराणे ॥ देवार्चनादिकर्माणि तथा गुर्वभि
वादनं ॥ कुर्वीत सम्यगाचम्य तद्वदेवान्नभुजिक्रियां ॥ वसिष्ठः ॥ क्षुते निष्ठीविते स्रस्ते परिधाने श्रुपातने ॥ पंचस्वेतेषु चाचामेच्छ्रोत्रं वा दक्षिणं स्पृशे
त् ॥ इत्याचमननिमित्तानि ॥ अथ द्विराचमननिमित्तान्याह ॥ हेमाद्रौ व्यासः ॥ दानेभोजनकाले च संध्ययोरुभयोरपि ॥ आचांतः पुनराचामे-
ज्जपहोमार्चनेषु च ॥ याज्ञवल्क्यः ॥ स्नात्वा पीत्वा क्षुते सुप्ते भुक्त्वा रथ्योपसर्पणे ॥ आचांतः पुनराचामेद्वासो विपरिधाय च ॥ कौर्मे ॥ ओष्ठौ
विलोमकौ स्पृष्ट्वा वासो विपरिधाय च ॥ रेतोमूत्रपुरीषाणामुत्सर्गेऽशुद्धभाषणे ॥ ष्ठीवित्वाध्ययनारंभे कासश्वासागमे तथा ॥ चत्वरं वा श्मशा
नं वा समागम्य द्विजोत्तमः ॥ संध्ययोरुभयोस्तद्वदाचांतोऽप्याचमेत्पुनः ॥ बौधायनः ॥ भोजने हवने दाने उपहारे प्रतिग्रहे ॥ हविर्भक्षणकाले च
द्विराचामेत्तु सर्वथा ॥ हविर्भक्षणोत्तरमाचमनं न कार्यमित्यपि पक्षांतरमपरार्के स्मृत्यंतरे ॥ द्राक्षादीनि फलानीक्षून्पयो मूलं घृतं दधि ॥
तांबूलमौषधं पत्रं हविर्भक्त्वापि नाचमेदिति ॥ आचमनविधिमाह योगी ॥ अंतर्जानुः शुचौ देश उपविष्ट उदङ्मुखः ॥ प्राग्वा ब्राह्मेण

र्येनाहिजोनित्यमुपस्पृशेत् ॥ त्रिः प्राश्यापोहिरुन्मृज्यखान्यद्भिः समुपस्पृशेत् ॥ इदंचद्विजातिविषयंत्र लंवतालुनाभिस्त्वयथासंख्यंद्विजातयः ॥ शुध्येरंस्त्रीचशूद्रश्चसकृत्स्पृष्टाभिरंतनइति ॥ याज्ञवल्क्येनस्त्रीशूद्रयोः ॥ सकृद्विधानात् ॥ उदङ्मुखत्वादिनियमोपिद्विजग्रहणात्ताद्विषयएव ॥ जलग्रहणंगोकर्णाकृतिकरेणकार्यमित्याहकण्व : ॥ आयतंपूर्वतः कृत्वागोकर्णाकृतिवत्कर ॥ संहतांगुलिनातोयंगृहीत्वापाणिनाद्विजः ॥ मुक्तांगुष्ठकनिष्ठेनशेषेणाचमनंचरेत् ॥ अन्वारंभमाहयमः ॥ तावन्नोपस्पृशेद्विद्वान्यावद्वामेननस्पृशेत् ॥ तीर्थमाहयोगी ॥ कनिष्ठादेशिन्यंगुष्ठमूलान्यग्रंकरस्यच ॥ प्रजापतिपितृब्रह्मतीर्थदेवान्यनुक्रमात् ॥ वृद्धपराशरः ॥ तीर्थानिपंचविप्रस्यकरेसंतिचदक्षिणे ॥ ब्राह्मंदैवंतथापैत्रंप्राजापत्यंचसौमिकं ॥ ब्राह्मंपश्चिमरेखायांदैवंत्वंगुष्ठमूर्धनि ॥ प्राजापत्यंकनिष्ठादौमध्येसौम्यंविजानतः ॥ अंगुष्ठस्यप्रदेशिन्यामध्येपैत्रंप्रतिष्ठितमिति ॥ करतलेत्वग्नितीर्थंतेनप्रतिग्रहः ॥ कार्यः ॥ तथाचप्रचेताः ॥ दक्षिणहस्तमध्येब्राह्मणस्याग्नेयतीर्थमाग्नेयेनप्रतिगृह्णीयादिति ॥ आचमनीयार्थंतोयमाह ॥ शंखः ॥ अद्भिः समुद्धृताभि स्तुहीनाभिः फेनबुद्बुदैः ॥ वह्निनानभितप्ताभिरक्षाराभिरुपस्पृशेत् ॥ उपस्पृशेदाचामेत् ॥ आतुराणामुष्णोदकमप्यविरुद्धं ॥ तथाचआपस्तंबः ॥ उदकेनातुराणांच तथोष्णेनोष्णपायिनामिति अगस्त्यसंहितायां ॥ केशवाद्यैस्त्रिभिः पीत्वाद्वाभ्यांप्रक्षालयेत्करौ ॥ द्वाभ्या मोष्ठौतुसंमृज्यद्वाभ्यामुन्मार्जनंतथा ॥ एकेनहस्तंप्रक्षाल्यपादावपितथैकतः ॥ संप्रोक्ष्यैकेनमूर्द्धानंचतः संकर्षणादिभिः ॥ आस्यनासाक्षिकर्णांश्चनाभिंत्वंसंप्रजोस्पृशेत् ॥ एवमाचमनंकृत्वासा

क्षान्नारायणोभवेत् ॥ शंखः ॥ तर्जन्यंगुष्ठयोगेनस्पृशेन्नासापुटद्वयं ॥ अंगुष्ठानामिकाभ्यांचचक्षुःश्रोत्रे पुनः पुनः कनिष्ठांगुष्ठयोर्नाभिंहृ
दयंचतलेनवै ॥ तलेनपाणितलेन ॥ सर्वाभिस्तुततःशीर्षंबाहूचाग्रेणसंस्पृशेत् ॥ अथप्रयोगः ॥ शुचौदेशेभूमिष्ठपादोंतर्जानुहस्तः ॥ प्रा
ङ्मुख उदङ्मुखोवोपविश्यसंहतांगुलिनाशुध्दंजलं ॥ गृहीत्वामुक्तांगुष्ठकनिष्ठेनवामेनान्वारब्धेनपाणिनाब्राह्मतीर्थेन केशवनारायणमा
धवेति संबुध्यंतैस्त्रिभिर्नामभिस्त्रिः पिबेत् ॥ गोविंदविष्णुइतिद्वाभ्यांकरौप्रक्षाल्यमधुसूदनत्रिविक्रमेतिद्वाभ्यांअंगुष्ठमूलेनोष्ठौसं
मृज्य वामनश्रीधरेतिद्वाभ्यांतथैवमुखमुन्मार्ज्यहृषीकेशेतिवामकरंप्रोक्ष्यपद्मनाभेतिपादौसंप्रोक्ष्यदामोदरेतिमूर्धानंसंप्रोक्ष्यसंकर्षणे
तिसंहतमध्यमांगुलित्रयेणास्यं संस्पृश्य वासुदेवप्रद्युम्नेतिद्वाभ्यामंगुष्ठतर्जनीभ्यांनासापुटेसंस्पृश्यानिरुद्ध पुरुषोत्तमेति द्वाभ्यामंगुष्ठा
नामिकाभ्यांचक्षुषीसंस्पृश्याधोक्षजनारसिंहेतिद्वाभ्यां तथैवश्रोत्रेसंस्पृश्याच्युतेतिकनिष्ठांगुष्ठाभ्यांनाभिंसंस्पृश्य जनार्दनेतिपा
णितलेन हृदयेसंस्पृश्योपेंद्रेतिशिरःसंस्पृश्यहरेकृष्णेतिद्वाभ्यांदक्षिणवामबाहुमूलेस्पृशेत् ॥ एवमाचमनासंभवेस्मृत्यर्थसारे ॥ त्रिः
पीत्वाहस्तंप्रक्षाल्यश्रोत्रंस्पृशेत् ॥ इत्याचारार्के आचमनप्रकरणं ॥ अथदंतधावनं ॥ अत्रिः ॥ मुखेपर्युषितेनित्यंभवत्यप्रयतोनरः ॥ त
दार्द्रकाष्ठंशुष्कंवाभक्षयेद्दंतधावने ॥ कात्यायनोपि ॥ उत्थायनेत्रेप्रक्षाल्यशुचिर्भूत्वासमाहितः ॥ परिजप्यचमंत्रेणभक्षयेद्दंतधावनमिति ॥
शुचिर्भूत्वाविण्मूत्रोत्सर्गेणशुचिर्भूत्वेत्यर्थः ॥ जपमंत्रःप्रयोगेवक्ष्यते ॥ अत्रिः ॥ कनिष्ठाग्रसमंस्थूलंपर्वाग्रकृतकूर्चकं ॥ दंतधावनमुद्दिष्टं

जिह्वोल्लेखनिकानया ॥ इदंदंतान्प्रक्षाल्यस्नायादितिछंदोगपरिशिष्टात्स्नानांगमितिकेचित् ॥ तन्न ॥ मध्यान्हस्नानादावपिदंतधावनप्रसंगा
त् ॥ नचेष्टापत्तिरितिवाच्यं ॥ अभ्यादिवचने मुखेपर्युषितेसत्येवआचमनवत्स्वनंचस्यैवतस्यशुद्धिहेतुतयाभिधानात् ॥ नहिमध्याह्नकालेमु
खस्यपर्युषितत्वंसंभवति ॥ तस्मात्पृथगेवनदितिसिद्धं ॥ अतएवश्रीमातामहचरणाद्दर्शपूर्णमासाभ्यामिष्ट्वासोमेनयजेतेतिवत्कालार्थः
संयोगइति ॥ युक्तमुत्पश्यंति ॥ दंतधावनेदिङ्‌नियममाहगर्गः ॥ प्राङ्मुखस्य भाप्नुतेसौख्यंशरीरारोग्यमेवच ॥ दक्षिणेनतथाकष्टंपश्चिमेन
पराजयः उत्तरेणगवांनाशः स्त्रीणांपारिजनस्यचेति ॥ अथकालादिनिषेधमाह ॥ व्यासः ॥ प्रतिपद्दर्शषष्ठीषुनवम्यांचैवभारत ॥ दंतानांका
ष्ठसंयोगेदहत्यासप्तमंकुलं ॥ श्राद्धेचयज्ञेनियमेनाद्यात्प्रोषितभर्तृका ॥ दंतकाष्ठमितिशेषः ॥ आचार्यः ॥ अष्टम्योश्चचतुर्दश्योः पंचद
श्यांत्रिजन्मसु ॥ व्यतीपातेचसंक्रांत्यांदंतकाष्ठंनभक्षयेत् ॥ वसिष्ठः ॥ शन्यर्कशक्रवारेषुकुजाहे व्रतवासरे ॥ जन्माहेश्राद्धदिवसेदंत
काष्ठंविवर्जयेत् ॥ यमः ॥ मध्यान्हेश्राद्धवेलायांयोभक्षेद्दंतधावनं ॥ निराशाः स्तस्यगच्छंतिदेवाः पितृगणैःसह ॥ दंतकाष्ठनिषेधक
र्तव्यमाह ॥ व्यासः ॥ अलाभेदंतकाष्ठानांनिषिद्धायांतिथौतथा ॥ अपांद्वादशगंडूषैर्विदध्याद्दंतधावनं ॥ तिथिग्रहणंनिषिद्धकालो
पलक्षणं ॥ दंतकाष्ठालाभेवर्ज्यकालेचतृणपर्णैर्द्वादशगंडूषैर्वामुखंसंशोध्यजिह्वोल्लेखः कार्यएव ॥ तथाच व्यासः ॥ प्रतिपद्दर्शष
ष्ठीषुनवम्यांदंतधावनं ॥ पर्णैरन्यत्रकाष्ठैस्तु जिह्वोल्लेखः सदैवतु ॥ स्मृत्यंतरेपि तृणपर्णैःसदाकुर्यादमामेकादशींविना ॥ निषि

द्वेदिवसेकुर्याज्जंबूस्त्राम्रपर्णकैरिति ॥ स्कांदे ॥ अभ्यंगेचोदधिस्नानेदंतधावनमैथुने ॥ जातेचमरणेचैवतत्कालव्यापिनीतिथिः ॥ दंतकाष्ठपरि
माणंविष्णुराह ॥ द्वादशांगुलिकंविप्रेकाष्ठमाहुर्मनीषिणः ॥ शूद्रविट्क्षत्रजातीनांनवषट्चतुरंगुलं ॥ अत्रोत्तरार्धेव्युत्क्रमेणान्वयोबोध्यः ॥ ग
र्गस्तु परिमाणांतरमाह ॥ दशांगुलंतुविप्राणांक्षत्रियाणांनवांगुलं ॥ अष्टांगुलंतुवैश्यानां शूद्राणांसप्तसंमितं ॥ चतुरंगुलमानंतुनारीणां
नात्र संशयः ॥ नृसिंहपुराणे ॥ तिन्त्रिणीवेणुशृष्टंच आम्रनिंबौतथैवच ॥ अपामार्गश्चबिल्वश्च अर्कश्चौदुंबरस्तथा ॥ बदरीतिंदुकास्त्वेते
प्रशस्तादंतधावने ॥ नारदोपि ॥ सर्वेकंटकिनःपुण्याःक्षीरिणश्चयशस्विनः ॥ प्रशस्ताइतिशेषः ॥ इत्थंमनुरपि ॥ खदिरस्यकरंजस्यकदं
बस्यतथैवच ॥ अर्कस्यकरवीरस्यकुटजस्यविशेषतइति ॥ इहैतेषांफलादिबहुविवक्तव्यंविस्तराकोपत्यानब्रुमः ॥ अंगिराः ॥ प्रक्षाल्यभ
क्षयेत्काष्ठंप्रक्षाल्यैवतुसंत्यजेत् ॥ आयुरित्यादिमंत्रोयमुक्तःशाखाभिमंत्रणे ॥ पैठीनसिः ॥ तृणपर्णोदकेनांगुल्यावादंतान्धावयेत्प्रदे
शिनीवर्जमिति ॥ शौनकः ॥ पश्चाद्द्वादशगंडूषैर्विदध्याद्दंतधावनं ॥ स्मृत्वोंकारंचगायत्रींनिबध्नीयाच्छिखांततइति ॥ अयंप्रयोगः ॥ प्र
तिपत्षष्ठ्यष्टमीनवम्येकादशीचतुर्दशीपंचदशीसंक्रांतिव्यतीपातव्रतोपवासश्राद्धदिनार्कभौमशुक्रमंददिननिषिद्धदिनातिरिक्तदिने
षु ब्राह्मणोद्वादशांगुलप्रमाणेनदशांगुलप्रमाणेनवाकनिष्ठांगुलिवत्स्थूलेनातिलिप्यादिविहितवृक्षोद्भवेनचूर्णीकृताग्रेणप्रक्षालितेनकूर्चे
णार्द्रेणवा ॥ आयुर्बलंयशोवर्चःप्रजाःपशुवसूनिच ॥ ब्रह्मप्रज्ञांचमेधांचत्वंनोधेहिवनस्पतइतिमंत्रेणाभिमंत्रितेन काष्ठेन ॥ मुखदुर्गं-

धिनाशायदंतानां चविशुद्धये ॥ ष्ठीवनायचगात्राणांकुर्वेहंदंतधावनमिति मंत्रमुक्त्वादंं तात्मशोध्यजिह्वोल्लेखंकृत्वाद्वादशगंडूषांश्चकृ
त्वा ॐकारंगायत्रींचस्मृत्वाशिखांबध्नीयादितिदंत धावनप्रकरणं ॥ अथप्रातःस्नानं ॥ हेमाद्रौयोगयाज्ञवल्क्यः ॥ अगम्यागमनात्या-
पात्यापेभ्यश्चप्रतिग्रहात् ॥ रहस्याचरितात्पापान्मुच्यतेस्नानमाचरन् ॥ अस्नात्वानाचरेत्कर्मजपहोमादिकंच्न ॥ लालास्वेदसमाकीर्णः
शयनादुत्थितःपुमान् ॥ हेमाद्रौदक्षः ॥ अत्यंतमलिनःकायोनवच्छिद्रसमन्वितः ॥ स्रवत्येषदिवारात्रौप्रातःस्नानंविशोधनं ॥ मार्कंडेयः ॥ –
अस्नातस्यक्रियाःसर्वाभवंतित्यफलायतः प्रातःसमाचरेत्स्नानंतच्चनित्यमितिस्मृतं ॥ प्रातःस्नानंप्रशंसंतिदृष्टादृष्टकरंहितत् ॥ सर्वमर्ह-
तिशुद्धात्माप्रातःस्नायीजपादिकं ॥ गुणादशस्नानपरस्यसाधोरूपंचतेजश्चबलंचशौचं ॥ आयुष्यमारोग्यमलोलुपत्वंदुःस्वप्ननाशश्चयश-
श्चमेधा ॥ तच्चत्रिविधमाहहेमाद्रौदक्षः ॥ नित्यंनैमित्तिकंकाम्यंत्रिविधंस्नानमुच्यते ॥ तर्पणंतुभवेत्तस्यअंगत्वेनप्रकीर्तितमिति ॥ दर्भयुक्तंस्ना
नंप्रशस्तमित्याहहारीतः ॥ दर्भयुक्तंप्रशस्तंस्यात्स्नानदानजपादिकं ॥ स्पृसंनरे ॥ स्नानेहोमेजपेदानेस्वाध्यायेपितृकर्मणि ॥ करौसदर्भौकु-
र्वीततथासंध्याभिवादने ॥ हेमाद्रावंगिराः ॥ विनादर्भेणयत्स्नानंयच्चदानंविनोदकं ॥ असंख्यातंचयज्जप्यंतत्सर्वंनिष्फलंभवेत् ॥ दर्भाश्चोक्ताः
प्रयोगपारिजाते ॥ कुशकाशायवादूर्वाउशीराश्चसकुंदकाः ॥ गोधूमाव्रीहयोमुंजादशदर्भाःसबल्वजाः ॥ बल्वजंशुच्यार्द्रतृणं कुशाभावेतुका
शास्तुः काशाः कुशासमाःस्मृताः ॥ कुशाभावेगृहीतव्याअन्येदर्भायथोचितं ॥ व्यासः ॥ कुशैःपूतंभवेत्स्नानंकुशेनोपस्पृशेद्द्विजः ॥ कुशेन

3755

चोद्धृतंतोयं ॥ सोमपानेनसंमितं ॥ शंखः ॥ दर्भाःकृष्णाजिनंमंत्राब्राह्मणाहविरग्नयः ॥ अयातयामान्येतानिनियोज्यानिपुनः पुनः ॥ यातयामंचिरंतेनकार्यास्तमंकुशग्रहणकालउक्तः कात्यायनेन ॥ मासेनभस्यमावास्यात स्यांदर्भोच्चयोमतः ॥ अयातयामास्तेदर्भाविनियोज्याःपुनःपुनः ॥ अत्रदर्भपदंकुशपरमेवदर्शेश्रावणमासस्यसमंत्रोत्पाटिताःकुशाइति विष्णूक्तेःस्पर्शमंत्रेकुशग्रहणाच्च ॥ आनयनप्रकारमाहमार्कंडेयः ॥ शुचिर्भूत्वाशुचौदेशेस्थित्वापूर्वोत्तरामुखः ॥ ॐकारेणैवमंत्रेणकुशान्स्पृष्ट्वाद्विजोत्तमः ॥ विरिंचिनासहोत्पन्नपरमेष्ठिनिसर्गज ॥ दहस्वसर्वपापानिदर्भस्वस्तिकरोभव ॥ हुंफट्कारेणदर्भास्तुसकृच्छित्वासमुद्धरेत् ॥ कुशमाहमानंगोभिलः ॥ कुशमूलेस्थितोब्रह्माकुशमध्येजनार्दनः ॥ कुशाग्रेशंकरंविद्यात्सर्वदेवाःसमंततइति ॥ ॥कुशपाविन्यमाहकात्यायनः ॥ अनंतर्गर्भिणंसाग्रंकौशंद्विदलमेवचप्रादेशमात्रंविज्ञेयंपवित्रंयत्रकुत्रचित् ॥ मार्कंडेयः ॥ चतुर्भिर्दर्भपिंजूलैर्ब्राह्मणस्यपवित्रकं ॥ एकैकंन्यूनमुद्दिष्टंवर्णेवर्णेयथाक्रमं ॥ हेमाद्रौ ॥ अन्यान्यपिपवित्राणिकुशदूर्वामयानिच ॥ हेमात्मकपवित्रस्यकलांनार्हंतिषोडशीं ॥ काम्यं चोक्तंशारदायां ॥ ताम्रतारसुवर्णानामर्कषोडशसंदुभिः ॥ कृतात्रिशक्तिमुद्रेयं तीव्रदुरितघ्ननाशिनी ॥ इदंपवित्रंतर्जन्यांधारयंतिसांप्रदायिकाः ॥ योगयाज्ञवल्क्यः ॥ अनामिकाधृतंहेमतर्जन्यांरूप्यमेवच ॥ कनिष्ठिकाधृतंखड्गं तेनपूतोभवेन्नरः ॥ रौप्यधारणमिदंजीवत्पितृकभिन्नविषयं ॥ तथाचप्रयोगपारिजाते ॥ उत्तरीयंयोगपट्टं तर्जन्यांरजतंतथा ॥ नजीवत्पितृकेधार्यंज्येष्ठोवाविद्यतेयदिइत्यलंप्रसंगागतं ॥ अथप्रकृतमनुसरामः ॥ बौधा-

यनः॥ सप्ताहंप्रातस्नायीसंध्याहीनस्त्रिभिर्दिनैः॥द्वादशाहमनग्निःस्याद्द्विजः शुद्रत्वमाप्नुयात्॥तद्दोषपरिहारार्थंभानुवारेपिशस्यते॥
भानुवारेत्ववश्यंप्रातःस्नानंकार्यमित्यर्थः॥स्नानकालमाहसएव॥ अरुणकिरणग्रस्तांप्राचींदिशमवलोक्यस्नायादिति॥स्नानंनद्या-
दिषुकार्यमित्याहहेमाद्रौमनुः॥नदीषुदेवखातेषुतडागेषुसरःसुच॥स्नानंसमाचरेन्नित्यंगर्तप्रस्रवणेषुच॥छंदोगपरिशिष्टे ॥धनुःसह-
स्राण्यष्टौचगतिर्यासांनविद्यते॥नतानदीशब्दवहागर्तास्तेपरिकीर्तिताः॥धनुर्हस्तचतुष्टयंविवस्वान्॥एकतःसर्वतीर्थानिजान्हव्येकैवचा
न्यतः॥ब्रह्मलोकेपिशिरसःपतितायामहीतलं॥मरीचिः॥ भूमिष्ठमुद्धृतंवापिशीतमुष्णमथापिवा॥गांगंपयःपुनात्येवपापमामरणांत-
तमिति॥अथस्नानविधिः॥प्रयोगपारिजाते॥नप्रातर्मृत्तिकास्नानंनकुर्याद्गोमयंनिशि॥प्रातःस्नानंसदाकुर्याद्गोमयेनविचक्षणः॥मध्यं
दिनेमृदास्नानंसायंकार्यंजलेनवै॥मनुः॥स्वसंस्थंगोमयंग्राह्यंभूमौनिपतितेपिवा॥उपर्यधश्चसंत्याज्यंसंपाद्यंमध्यमंहियत्॥नाभिमात्रेज
लेगत्वात्रिःकुर्यान्मज्जनंततः॥गात्राणांक्षालनंकृत्वासम्यक्स्नायात्ततःपरं॥सम्यग्गोमयादिविधिनेत्यर्थः॥आदायगोमयंविप्रोवाम
पाणौनिधायच॥व्याहृत्यातत्त्रिधाकृत्वानिक्षिपेत्प्रणवेनतु॥दक्षिणास्थितभागेनरक्षोहानायदिक्ष्वथ॥तीर्थेभसिक्षिपेद्भागमुत्तरंतार
मंत्रितं॥मानस्तोकेतिमंत्रेणमध्यंचैवाभिमंत्रियेत्॥मूर्धादिपादपर्यंतंहस्ताभ्यांसुसमाहितः॥गंधद्वारामित्यनयासर्वांगमनुलेपयेत्
॥प्रार्थनादिमंत्रांस्तुप्रयोगेवक्ष्यामः॥पुराणे॥ततःशिखांस्वपुरतः कृत्वामज्जेन्नदीमुखः॥ विष्णुः॥स्रोतसोभिमुखंस्नायान्नदीषु-

प्रवाहज्जले स्थावरेचतडागेचरवेरभिमुखंसदा ॥ न्यायवीये ॥ संध्यामुखस्तुसंध्यायांरात्रौप्राङ्मुखएवसन् ॥ स्रोतसोभिमुखंस्नानंमा-
र्जनंचाघमर्षणं ॥अन्यत्रार्कमुखोरात्रौप्राङ्मुखोग्निमुखोपिवा ॥कात्यायनः ॥पुत्रजन्मनिमित्तेषुसर्वेषामुत्तरामुखं ॥गृहेगृहमुखंस्नान
मार्जनादितुनोभवेत् ॥प्रयोगपारिजाते ॥आचम्यमार्जनंकुर्यादापोहिष्ठेतिवारुणैः ॥इमंमेगंगइत्यृदकमालोड्यचाघमर्षणं ॥अंतर्जलेमुखं
कृत्वाकुर्यान्नासाग्रपीडनं ॥ऋतंचेतिस्त्युचंचैवद्रुपदांचततोजपेत् ॥अष्टाक्षरंचप्रणवंस्मरेद्विष्णुमजंप्रभुं ॥अष्टाक्षरमंत्रः शारदायां ॥ ना
रंनमः पदंपश्चान्नरौदीर्घसमन्वितौ ॥यवर्णेण यमंत्रोयंप्रोक्तोवस्त्वक्षरात्मकइति ॥ शौनकः ॥कुर्याद्द्वादशभिःस्नानंनामभिः केशवादि-
भिः ॥धन्यंयशस्यमायुष्यमारोग्यंबुद्धिवर्धनं ॥हस्ताभ्यांजलमादायसकृदेवाभिमंत्रितं ॥मस्तकेचमुखेबाह्वोर्हृदयेपृष्ठदेशके ॥अभि
षिंचेत्स्वमात्मानंगायत्र्यायोनिमुद्रया ॥सप्तजन्मकृतंपापंतत्क्षणादेवनश्यति ॥कार्ष्णाजिनः ॥देवर्षिपितृणांचैवएकाद्विस्त्रिक्रमेणतु ॥-
जलेदद्याज्जलंचात्रअसंस्कृतांतटेतथा ॥असंस्कृतांमृतानामित्यर्थः ॥असंस्कृतप्रमीतानामेकएवतटेक्षिपेत् ॥ इतिबौधायनोक्ते ॥
चतुर्विंशतिमते ॥स्नानादनंतरंतावत्तर्पयेत्पितृदेवताः ॥उत्तीर्यपीडयेद्वस्त्रंसंध्याकर्मततः परं ॥ व्यासः ॥ यज्ञोपवीतीदेवानांनिवीती
ऋषितर्पणे ॥प्राचीनावीतीपित्र्येतुस्वेनतीर्थेनभावितः ॥ उशना ॥ द्वौहस्तौयुग्मतः कृत्वापूरयेदुदकांजलिं ॥गोशृंगमात्रमुधृत्यजलम
ध्येजलंक्षिपेत् ॥हेमाद्रौब्रह्मवैवर्ते ॥ नाभिमात्रेजलेस्थित्वाकुर्यात्स्नानांगतर्पणं ॥ देवानृषीन्पितृगणान्स्वपितॄंश्चाक्तिर्पयेत् ॥ भगवान्

स्नानांगतर्पणंकृत्वायस्मणेजलमाहरेत्॥ नदीक्षमापनंकौर्मे ॥ ज्ञानतोऽज्ञानतोवापियन्मयादुष्कृतंकृतं॥ तत्क्षमस्वाखिलंदेवि जगन्मातर्नमो-
स्तुते॥ स्मृत्यंतरे॥ विकिरेपिंडदानेचतर्पणेस्नानकर्मणि॥ आचांतः सन्प्रकुर्वीतदर्भसंत्यज्य नंबुधः॥ मदनपारिजातेशातातपः॥ अवमृज्या-
न्नचस्नातोगात्राण्यंबरपाणिभिः॥ नचापिधूनयेत्केशान्वाससीनविधूनयेदितिशातातपः॥ बहिर्नद्यादिष्वाचांतः सोदकः किंचिदस्पृशा-
न्॥ रथ्यागतोपियत्नेनशफचिरेवहिमानवइति॥ अथवस्त्रधारणंदेवलः॥ स्वयंधौतेनकर्तव्याक्रियाधर्माविपश्चिता॥ नतुनेजकधौ-
तेननाहतेनचकर्हिचित्॥ धौतवस्त्रशोषणप्रकारमाहशातातपः॥ प्रागग्रमुदगग्रंवाधौतंवासः प्रसारयेत्॥ दक्षिणाग्रंपश्चिमाग्रं
पुनः प्रक्षालनंभवेत्॥ स्मृत्यंतरे॥ ईषद्धौतंस्त्रियाधौतंशूद्रधूतंतथैवच॥ प्रसारितंयमदिशि गर्हितंसर्वकर्मसुइतिदक्षस्मृतौ॥ श्रु-
तिस्मृतिप्रमाणेनग्राह्यंवस्त्रंचधारयेत्॥ षट्कर्मनिरतोविप्रोग्राह्यंवस्त्रंनधारयेत्॥ षट्कर्माणिचोक्तानिस्मृत्यंतरे॥ स्नानंसंध्याजपोहोमः
स्वाध्यायः पितृतर्पणं॥ मनुः॥ ब्राह्मणस्यसितंवस्त्रंमांजिष्ठंनृपतेःस्मृतं॥ पीतंवैश्यस्यशूद्रस्यनीलंमलवदिष्यते॥ याज्ञवल्क्यः॥
अष्टहस्तंनवंश्वेतंसदशंनान्यधारितं॥ अहतंतद्विजानीयात्सर्वकर्मसुपावनं॥ यंत्रनिर्मुक्तमक्षालितमप्यहतमित्याह॥ धर्मप्रकाशेस
त्यतपाः॥ अहतंयंत्रनिर्मुक्तमुक्तंवासः स्वयंभुवा॥ शस्तंतन्मांगलिक्येषुतावत्कालंनसर्वदा॥ मांगलिक्यंमंगलकर्माणिविवाहादीनि
॥ कच्छस्थानान्याहयाज्ञवल्क्यः॥ वामकुक्षौचनाभौचपृष्ठेचैवयथाक्रमं॥ त्रिकच्छेनसमायुक्तोद्विजोसौमुनिरुच्यते॥ विष्णुपुराणे॥

होमेदेवार्चनाद्यासु क्रियासु पठनेतथा ॥ नैकवस्त्रः प्रवर्तेत द्विजोनाचमनेजपे ॥ द्वितीयवस्त्राभावेपरिधानवस्त्रेणैवोत्तरीयंकार्यं ॥ एवं
चेद्वासोभवतितस्यैवोत्तर वर्गेणप्रच्छादयीतेतिपारस्करगृह्यात् ॥ उत्तरीयाभावेवस्त्रस्योर्ध्वभागउत्तरीयंकुर्यादितियोगीश्वरवचनाच्च ॥ स्मृ
त्यंतरे ॥ यज्ञोपवीतेद्वेधार्येश्रौतेस्मार्तेचकर्मणि ॥ तृतीयमुत्तरीयार्थेवस्त्राभावेचतु र्थकं ॥ आचारमयूखादिग्रंथेषुतुवस्त्राभावेत-
दिष्यतइतिपाठः ॥ परशुरामनिबंधेतु ॥ उपवस्त्रंयदानस्यात्तदाचत्वारिधारयेदितियज्ञोपवीतप्रकरणेउक्तं ॥ आर्द्रवस्त्रमूर्ध्वमार्गेण
निष्काशनीयमित्युक्तं ॥ प्रयोगपारिजाते ॥ स्नानंकृत्वार्द्रवस्त्रंतुऊर्ध्वमुत्तारयेद्द्विजः ॥ आर्द्रवस्त्रमधस्ताच्चेत्पुनः स्नानेनशुध्यति ॥ इदंच
गृहस्नानविषयं ॥ ऊर्ध्वमुत्तारयेद्वस्त्रंगृहेनद्यामधस्त्यजेदित्याचारादर्शेबौधायनोक्तेः ॥ अथप्रसंगाद्गृहस्नानविधिरुच्यते ॥ व्यासः ॥ शी-
तास्वप्सुनिषिच्योष्णामंत्रसंभारयोगतः ॥ गृहेऽपिशस्यतेस्नानंतद्धीनमफलंस्मृतं ॥ यमः ॥ आपएवयदापूतास्तासांवह्निर्विशोधकः
तस्मात्सर्वेषुकालेषुउष्णांभः पावनंस्मृतं ॥ पादौप्रक्षालयेत्पूर्वंमुखंयज्ञोपवीतिकं ॥ द्विराचम्यकराभ्यांचदर्भान्धृत्वाशिखांस्पृशेत् ॥ प्रा
णायामंततः कुर्यात्कालज्ञानंयथोदितं ॥ आपोहिष्ठेतिसूक्तेनइमंमेगंगइत्यथ ॥ अतोदेवेतिसूक्तेनसावित्र्याचविशोधयेत् ॥ शीतोदकंतु
दत्तैस्तु पश्चादुष्णोदकंक्षिपेत् ॥ अत्रमार्जननिषेधमाहबौधायनः ॥ गृहस्नानेनतुप्रोक्तंमार्जनंतर्पणादिकं ॥ नांतराचमनंप्रोक्तंपश्चा
दाचम्यशुध्यति ॥ संग्रहे ॥ स्नानमध्येनाचमनंमार्जनंतर्पणंनच ॥ वस्त्रस्यपीडनंनैवसंकल्परहितंतथा ॥ संकल्परहितंस्नानमध्ये

संकल्परहितंनतुसर्वथासंकल्पवर्जितमित्यर्थः ॥ गृहेगृहस्थमुख्यस्नानंमध्येसंकल्पवर्जितमिति ॥ बृहद्यमोक्तेः ॥ केचित्तुगृहस्नानेसंक-
ल्पमेवनेच्छंतितदसत् ॥ संकल्पंचयथाकुर्यात्स्नानदानव्रतादिके ॥ अन्यथापुण्यकर्माणिनिष्फलानिभवंतिचेति ॥ मार्कंडेयवाक्या-
त्संकल्पस्यचावश्यत्वोक्तेः संकल्पमूलः कामोवैयज्ञाः संकल्पसंभवाः ॥ व्रतंनियमधर्माश्चसर्वेसंकल्पजाः स्मृताइति मनूक्तेश्च
॥ अत्रेष्टस्नानताज्ञानसंकल्पः कथमिदमनेनसाधयामीत्य छागाकः मंडनः ॥ मुख्यकालेयदावश्यंकर्मकर्तुंनशक्यते ॥ गौणकाले
पिकर्तव्यंगौणोप्यत्रेदृशोभवेत् ॥ ईदृशोमुख्यसमः अत्रविशेषस्तेनैवोक्तः ॥ गौणेष्वेतेषुकालेषुकर्मचोदितमाचरन् ॥ प्रायश्चि-
त्तमकरणप्रोक्तानिष्कृतिमाचरेत् ॥ इतिस्नानविधिः ॥ अथप्रयोगः ॥ अरुणोदयेंतरिक्षस्थगोमयंसगृह्यतदभावेभूमिष्ठमे-
वोपर्यधश्चसंत्यज्यमध्यस्थंगृहीत्वाऽन्यांस्नानसामग्रींचादायगंगातीर्थमेत्याऽऽहृतजलेनमुखंपाणिपादौचप्रक्षाल्येष्टदेवतां
स्मृत्वानाभिमात्रजलंगत्वात्रिर्निमज्ज्यांगप्रक्षालनंकृत्वादेशकालौस्मृत्वाममकायवाङ्मनःकृतकर्मदोषपरिहारद्वाराश्रीपरमे-
श्वरप्रीत्यर्थंप्रातःस्नानंकरिष्यइतिसंकल्प्यगोमयंसव्येपाणौकृत्वा ॐ भूर्भुवः स्वरितित्रेधाविभज्यदक्षिणभागंप्रणवेनप्राच्यांदिदि-
क्षु निक्षिप्योत्तरभागंचतथैवतीर्थेनिक्षिप्यमध्यमभागंमानस्तोकेइतिमंत्रेणाभिमंत्र्यगंधद्वारांदुराधर्षांनित्यपुष्टांकरीषिणीं ॥ ईश्वरींस-
र्वभूतानांतामिहोपह्वयेश्रियं ॥ अग्रमग्रंचरंतीनामोषधीनांवनेवने ॥ तासामृषभपत्नीनांपवित्रंकायशोधनं ॥ तन्मेरोगांश्चशोकांश्चनु

इमंमेपयसर्ववेदेतिमंत्राभ्यांमूर्धादिसर्वांगमनुलिप्य ॥ हिरण्यशृंगंवरुणंप्रपद्येतीर्थंमेदेहियाचितः॥ यन्मयाभुक्तमसाधूनांपापेभ्यश्चप्रतिग्रहः
यन्मेमनसावाचाकर्मणावादुष्कृतंकृतं ॥ तन्नइंद्रोवरुणोबृहस्पतिःसविताचपुनंतुपुनः पुनरितिद्वाभ्यांवरुणंसंप्रार्थ्यबद्धशिखाःपुरतः कृत्वा
प्रवहज्जलेप्रवाहाभिमुखस्त्रिवारमवगाह्यशरीरंप्रक्षाल्य आपोहिष्ठेतिनवर्चसूक्तेनमार्जनंविधायांगुष्ठमूलेनजलंप्रदक्षिणमालोड्येत् ॥
इमंमेगंगेइत्यस्यप्रैयमेधः सिंधुर्नद्योजगतीजलालोडनेविनियोगः ॥ इमंमेगंगेयमुनेसरस्वतिशुतुद्रिस्तोमंसचतापरुष्ण्या ॥ असिक्न्याम
रुद्वृधेवितस्तयार्जीकीयेशृणुह्यासुषोमया ॥ इत्यालोड्यजलेप्रमुखंकृत्वानासाग्रंसंपीड्याघमर्षणंकुर्यात् ऋतंचेतित्र्यृचेन ॥ ततः ॥ ॐनमोनाराय
णायेत्यष्टाक्षरंमंत्रं ॥ द्रुपदादिवेन्मुमुचानः ॥ स्विन्नःस्नातीमलादिवा ॥ पूतंपवित्रेणेवाज्यं ॥ आपःशुंधंतुमैनसः ॥ इतिचजपित्वा ॐविष्णुंच-
स्मृत्वा केशवादिदामोदरांतैर्द्वादशनामभिर्द्वादशकृत्वो आप्लुत्ययोनिमुद्रयाजलमादायमूर्ध्निमुखेबाह्वोर्हृदयेपृष्ठदेशे ॥ गायत्र्याभिषि-
च्य ॥ नंदिनीनलिनीसीतामालतीचमलापहा ॥ विष्णुपादाब्जसंभूतागंगात्रिपथगामिनी ॥ भागीरथीभोगवतीजान्हवीत्रिदशेश्वरी ॥ द्वा
दशैतानिनामानियत्रयत्रजलाशये ॥ स्नानयुक्तःसदाब्रूयात्तत्रतत्रवसाम्यहं इतिगंगावाक्यंपठित्वानाभिमात्रजलंगतः स्नानांगतर्पणंकु
र्यात् ॥ तच्चेत्थं ॥ प्राङ्मुखःसाक्षताभिरद्भिरुपवीती ब्रह्मादयोयेदेवास्तान्देवांस्तर्पयामि ॥ भूर्देवांस्तर्पयामि ॥ भुवर्देवांस्तर्पयामि ॥ स्व
र्देवांस्तर्पयामि ॥ भूर्भुवस्वर्देवांस्तर्पया मीतिपंचमंत्रैरेकैकमंजलिंदेवतीर्थेनदत्वानिवीतीउदङ्मुखः कृष्णद्वैपायनादयोयेऋषयः ॥

स्तान्कृषींस्त॰॥ भूर्कृषींस्त॰॥ भुवर्कृषींस्त॰॥ स्वर्कृषींस्त॰॥ भूर्भुवःस्वऋषींस्तर्पयामीतिपंचभिर्द्वौद्वावंजलीसयवाभिरद्भिः प्राजापत्यती-
र्थेनदत्वाथदक्षिणामुखः ॥ प्राचीनावीतीपितृतीर्थेनसतिलाभिरद्भिः सोमःपितृमान्यमोंगिरस्वानग्निष्वात्ताःकव्यवाहनादयोयेपितरस्तान्
पितॄंस्तर्पयामि ॥ भूः पितॄंस्तर्पयामि ॥ भुवः पितॄंस्तर्पयामि ॥ स्वः पितॄंस्तर्पयामि ॥ भूर्भुवःस्वः पितॄंस्तर्पयामीतिपंचभिस्त्रि स्त्रिस्तर्प
यित्वातीरमेत्य अग्निदग्धाश्चयेजीवायेप्यदग्धाःकुलेमम ॥ भूमौदत्तेनतोयेनतृप्तायांतिपरांगतिमितिमंत्रेणांजलिंतटेनिक्षिप्ययेकेचास्म-
त्कुलेजाता अपुत्रागोत्रिणोमृताः ॥ तेगृण्हंतुमयादत्तंवस्त्रनिष्पीडनोदकमितिवस्त्रंतीरेनिष्पीड्योपवीतीयन्मयादूषितंतोयंशारीरमल-
संभवात् ॥ तद्दोषपरिहारार्थंयक्ष्माणंतर्पयाम्यहं इतियक्ष्मतर्पणंविधायपूर्वोक्तंशुष्कवासःपरिधायोत्तरीयार्थंद्वितीयंप्रावृत्यचतुर्गुणी
कृतंपरिधानीयंउपरिदशांनिष्पीड्यद्विराचम्यतिलकंकुर्यात् ॥ अथतिलकंप्रयोगपारिजाते ॥ ललाटेतिलकंकृत्वासंध्याकर्मसमाचरेत् ॥
अकृत्वाभालतिलकंतस्यकर्मनिरर्थकं ॥ मृद्भस्मचंदनंप्रोक्तंतोयंचैवचतुर्थकं ॥ स्नात्वापौंड्रंमृदाकुर्यात्धुलाचैवतुभस्मना ॥ देवानभ्यर्च्यगं
धेनजलमध्येजलेनतु ॥ मृदोर्ध्वपुंड्रंभस्मनातिर्यक्चंदनेनोभयमित्याहकात्यायनः ॥ ऊर्ध्वपुंड्रंमृदाकुर्याद्भस्मनातुत्रिपुंड्रकं ॥ उभयंचंदनेनैव-
अभ्यंगोत्सवरात्रिषु ॥ ऊर्ध्वपुंड्रस्यावश्यकत्वमुक्तंसारसमुच्चये ॥ ऊर्ध्वपुंड्रविहीनस्यश्मशानसदृशंमुखं ॥ अवलोक्यमुखंतस्यश्रीस्सू
र्यमवलोकयेत् ॥ बृहन्नारदीये ॥ स्नानंदानंजपोहोमः ॥ संध्यास्वाध्यायकर्मसु ॥ ऊर्ध्वपुंड्रविहीनेननत्सर्वंनिष्फलंभवेत् ॥ ब्रह्मपुराणे

गंगातीरसमुद्भूतांमृदंभूर्ध्नाबिभर्तियः ॥ बिभर्तिरूपंसोर्कस्यतमोनाशायकेवलं ॥ तिलकस्थानानिब्रह्मांडे ॥ ललाटेकेशवंविद्यान्नारायण
मथोदरे ॥ माधवंहृदयेन्यस्यगोविंदंकंठकूपके ॥ विष्णुंचदक्षिणेकुक्षौतद्भुजेमधुसूदनं ॥ त्रिविक्रमंकर्णमूलेवामकुक्षौतुवामनं ॥ श्रीधरंच-
तपीकेशंवामयोर्बाहुकर्णयोः ॥ पद्मनाभंपृष्ठदेशेककुद्दामोदरंस्मरेत् ॥ मूर्ध्निमूलेनमंत्रेणशेषंद्वादशनामभिः ॥ संकर्षणादिभिः कृष्णोशक्कुर्वे
त्केशवादिभिः ॥ व्यासस्तु ॥ वामहस्तेजलंकृत्वासावित्र्याचाभिमंत्रितं ॥ तद्विष्णोरितिमंत्रेणमर्दयेन्मृत्तिकांततः ॥ अतोदेवेतिसूक्तेनतिलकं
धारयेत्सदाइत्याह ॥ एवंयथासंप्रदायंतिलकंकुर्यात् ॥ अथभस्मधारणविधिःसंग्रहे ॥ अग्निहोत्राग्निजंभस्मह्विरजाहोमजंतथा ॥ औपास
नसमुत्पन्नंसमिदग्निसमुद्भवं ॥ समिदग्निसमुत्पन्नंधार्यंवैब्रह्मचारिणा ॥ शूद्राणांश्रोत्रियागारपचनाग्निसमुद्भवं ॥ अन्येषामपिसर्वेषांधार्यं
दावानलोद्भवमितिपुलस्त्यः ॥ अग्निरित्यादिभिर्मंत्रैः शुद्धंभस्माभिमंत्रितंशिवमंत्रेणतद्ब्रह्ममंत्रेणाष्टाक्षरेणवा ॥ गायत्र्यावाथदेवर्षेमंत्रेण-
प्रणवेनवेति ॥ आचार्यः ॥ ललाटेहृदयेकंठेबाह्वोः पृष्ठेपरेगले ॥ त्रिपुंड्रंभस्मनाकुर्यादिष्टमंत्रेणमानवइति क्रियासारे ॥ वामहस्ततलेभस्म-
क्षिप्त्वाच्छायान्यपाणिना ॥ अग्निरित्यादिमंत्रेणस्पृशन्भस्माभिमंत्र्यचस्मृतिसंग्रहे ॥ धार्यंभस्मत्रिसंध्यंतुगृहिणाजलसंयुतं ॥ सार्वकालंभ
वेत्स्त्रीणांयतीनांजलवर्जितं ॥ वानप्रस्थस्यकन्यानांदीक्षाहीननृणांतथा ॥ मध्यान्हात्प्राग्जलैर्युक्तंपरतोजलवर्जितं ॥ मध्यांगुलित्रयेणैव-
स्वदक्षिणकरस्यच ॥ त्रिपुंड्रंधारयेद्विद्वान्सर्वकर्मसुसर्वदा ॥ कात्यायनः ॥ श्राद्धेयज्ञेजपेहोमेवैश्वदेवेसुरार्चने ॥ धृतत्रिपुंड्रः पूतात्मामृत्युं

जयतिमानवः ॥ भविष्ये ॥ सितेनभस्मना कुर्यात्रिसंध्यंचत्रिपुंड्रकं सर्वपापविनिर्मुक्तः शिवेन सहमोदते ॥ सत्यंशौचंजपोहोमः स्तीर्थेदेवादि
पूजनं ॥ तस्यव्यर्थमिदंसर्वंयस्त्रिपुंड्रंनधारयेत् ॥ अत्रोक्तोग्निरित्यादिमंत्रोअथर्वशिखायांदर्शितः ॥ अग्निरितिभस्मवायुरितिभस्मजलमि
तिभस्मस्थलमितिभस्मव्योमेतिभस्मसर्वं ह वाइदंभस्म ॥ मनएतानिचक्षूंषिभस्मानीति ॥ अस्यऋष्यादिःस्मर्यते ॥ भस्मवामह
स्तेकृत्वाभस्माभिमंत्रणामित्यस्यपिप्पलादिऋषिः॥रुद्रोदेवता ॥ गायत्रीछंदः ॥ भस्मशुध्यर्थेजपेविनियोगः ॥ इतित्रिपुंड्रभस्मधारणावि
धिः ॥ एवंभस्मधारणाविधिः एवंभस्मधृत्वासंध्यांकुर्यात् ॥ अथसंध्याविधिः ॥ मरीचिः संध्यायेननविज्ञातासंध्यायेनानुपासिता ॥ जी
वमानोभवेच्छूद्रोमृतःश्वाचाभिजायते ॥ इतिसंध्यायानित्यत्वमुक्तंदक्षः संध्याहीनोशुचिर्नित्यमनर्हःसर्वकर्मसु ॥ यदन्यत्कुरुतेकर्मन-
तस्यफलभाग्भवेदितिशुचित्वसंपादनेनकर्मांगत्वमप्युक्तं ॥ तच्चप्रातःसंध्यायाएवेतिकेचित् ॥ श्रीमातामहचरणास्तु ॥ संध्याग्र
यस्यापिवचनांतरप्राप्तत्वात्संध्याकालोत्तरतत्तत्कर्मांगत्वमितियुक्तमुत्पश्यंतिसंध्याकालोधर्मसारे ॥ उत्तमातारकोपेतामध्यमालु
प्ततारका ॥ अधमासूर्यसहिताप्रातःसंध्यात्रिधामता ॥ उत्तमासूर्यसहितामध्यमालुप्ततारका ॥ कनिष्ठातारकोपेतासायंसंध्या
त्रिधामता ॥ प्रयोगपारिजाते ॥ उदयास्तमयादूर्ध्वंयावत्स्याद्घटिकात्रयं ॥ तावत्संध्यामुपासीतप्रायश्चित्तंततःपरं ॥ तच्चशाता
तपीये ॥ संध्याकालेत्वतिक्रांतेस्नात्वाचम्ययथाविधि ॥ जपेदष्टशतंदेवींततःसंध्यांसमाचरेत् ॥ मदनपारिजातेतु ॥ कालातिक्रमणेचैवचतु-

र्योर्घ्यंप्रदापयेदित्युक्तं ॥ शौनकः ॥ प्राणानायम्यविधिवद्ब्राम्यतः संयतेंद्रियः ॥ अथसंध्या मुपासिष्येइतिसंकल्प्यप्रमार्जयेत् ॥ सएव ॥ नासिका-
मंगुलीभिस्तु तर्जनीमध्यमारृते ॥ सव्येनतुसमाकृष्यदक्षिणेनविसर्जयेत् ॥ प्रणवव्याहृतीः सप्तगायत्रींशिरसासह ॥ त्रिःपठेदायतप्राणःप्रा
णायामस्सउच्यते ॥ ऋग्विधाने ॥ नवप्रणवयुक्तेन आपोहिष्ठात्रृचेनतु ॥ संवत्सरकृतंपापंमार्जनांतेविनश्यति ॥ कात्यायनः ॥ दक्षिणेरेचयेद्वायुंवामे
नापूरितोदरं ॥ कुंभकेनजपंकुर्यात्प्राणायामो भवेदिति ॥ प्रयोगपारिजाते ॥ पंचांगुलीभिर्नासाग्रंपीडयेत्प्रणवेनवै ॥ मुद्रेयंसर्वपापघ्नीवानप्रस्थगृ
हस्थयोः कनिष्ठानामिकांगुष्ठैर्यतेश्चब्रह्मचारिणः ॥ तिसृभिर्मार्जनंकुर्या दापोहीतिकुशोदकैः प्रतिपादंक्षिपेन्मूर्ध्निप्रतिप्रणवसंयुतं ॥ प्रजा
प तिः ॥ ऋगंतेमार्जनंकुर्यात्पादांतेवासमाहितः ॥ अर्धर्चांतेथवाकुर्याच्छिष्टानांमतमीदृशं ॥ मंत्राचमनमाहशौनकः ॥ अथाचमनमादायसूर्य
श्चेतिपिबेदपः अथमध्यंदिनेत्वापः पुनंत्विति चमंत्रतः ॥ मार्जनांतराण्याह सएव ॥ प्रणवेनव्याहृतिभिर्गायत्र्याप्रणवाद्यया ॥ आपोहिष्ठेतिसू
क्तेनमार्जनंह्निचतुर्थकं ॥ इमानिमार्जनानिगृहेपात्रांतरमादायकार्याणि ॥ तथाचपारिजाते ॥ नद्यांतीर्थेह्रदेतत्रभाजनेमृन्मयेगृहे ॥ औदुंबरेच
सौवर्णेराजतेदारुसंभवे ॥ कृत्वातुवामहस्तेवासंध्योपास्तिंसमाचरेत् ॥ औदुंबरंताम्रंवामहस्तेतुसर्वथापात्रांतराभावेबोध्यमिति श्रीमातामह-
चरणाः पात्रार्पतमाहमरीचिः ॥ गोकर्णाकृतिवत्पात्रंताम्रंरौप्यंचहाटकं ॥ जलंतत्रविनिक्षिप्यसंध्योपासनमाचरेत् ॥ अथपापपुरुषमाहशौनकः ॥
उद्धृत्यदक्षिणेहस्तेजलंगोकर्णवत्कृते ॥ निश्वास्यनासिकाग्रेतुपाप्मानंपुरुषंस्मरेत् ॥ ऋतंचेतित्र्यृचेवापिद्रुपदांवाजपेदृचं ॥ दक्षनासापुटेनैवपा-

ध्यानमपसारयेत् ॥ तज्जलंनावलोक्याथवामभागेक्षितौक्षिपेत् ॥ अथार्घ्यदानंगृह्यपरिशिष्टे ॥ अथाचम्यदर्भपाणिः पूर्णमुदकांजलिरादित्याभि
मुखः स्थित्वाप्रणवव्याहृतिपूर्वयासावित्र्यात्रिर्निवेदयेत्क्षिपेत्तदेवार्घ्यनिवेदनं ॥ असावादित्योब्रह्मेतिप्रदक्षिणंपरिपतन्परिषिच्याप उपस्पृशेदि
ति ॥ शौनकः ॥ ईषन्नम्रः प्रभातेतुमध्याह्नेऋजुसंस्थितः ॥ द्विजोर्घ्यंप्रक्षिपेद्देव्यासायंतूपविशन्भुवि ॥ मदनरत्नेव्यासः ॥ कराभ्यांतोयमादायगा
यत्र्याचाभिमंत्रितं ॥ आदित्याभिमुखस्तिष्ठंस्त्रिरूर्ध्वंसंध्ययोः क्षिपेत् ॥ सकृदेवतुमध्याह्नेक्षेपणीयंद्विजातिभिरिति ॥ अथगायत्रीजपस्तत्रैव ॥
धृत्वापवित्रंसंप्रोक्ष्यजपस्थानंकुशोदकैः ॥ आधारादीन्नमस्कृत्यकुशाग्रैरासनंततः ॥ बध्वापद्मासनंवापिस्वस्तिकंवायथासुखं ॥ ॐ भूर्भुवः स्वरो
मितिजपित्वारुह्यासनं हितत् ॥ गृह्यपरिशिष्टेपि ॥ शुचौदेशेदर्भासीनोक्षितेदर्भानास्तीर्य ॥ व्याहृतिभिरुपविश्यप्राणायामत्रयंकृत्वात्मानंव्या
हृतिभिरभ्युक्ष्यसावित्र्याऋषिदैवतछंदांस्यनुस्मृत्यषड्भिस्तदंगमंत्रैर्यथांगमात्मनिन्यस्यात्मानंतद्रूपंभावयेद्यथा ॥ तत्सवितुर्हृदयायनमइति
हृदये वरेण्यंशिरसेस्वाहेतिशिरसिभर्गोदेवस्यशिखायैवषडितिशिखायांधीमहिकवचायहुमितिउरसिधियोयोनइतिनेत्रत्रयायवौषडितिने
त्रललाटेषुविन्यस्याथप्रचोदयादित्यस्त्रायफडितिकरतलेरस्त्रंप्राच्यादिदिक्षुन्यसेदेषोंगन्यासएनमप्येकेनेच्छंतिसवि धिर्वैदिक इतिध्यात्वा
गच्छंवरदेदेवीत्यावाह्यनिष्ठन्नर्धनक्षत्रेषामंडलदर्शनान्मंत्रार्थमनुसंदधानःसप्रणव व्याहृतिपूर्विकांसावित्रींजपेदि ति ॥ याज्ञवल्क्यः ॥ ध्या
येत्तु मनसामंत्रंजिह्वोष्ठौनविचालयेत् ॥ नकंपयेच्छिरोग्रीवांदंतान्नैवप्रकाशयेत् ॥ यक्षरक्षः पिशाचाश्चसिद्धविद्याधरागणाः ॥ यस्मात्प्रभावं

गृष्हंतितस्माहुत्यंतुकारयेत् ॥ मनुः ॥ विधियज्ञाज्जपयज्ञोविशिष्टोदशभिर्गुणैः ॥ उपांशुः स्याच्छतगुणः सहस्रोमानसः स्मृतः ॥ जपेसं-
ख्यास्मृत्यंतरे ॥ सायंप्रातश्चमध्यान्हेसावित्रींवाप्यतांजपेत् ॥ सहस्रपरमांदेवींशतमध्यांदशावरां ॥ अथगायत्रीजपलक्षणं ॥ संपुटैकषडोंकारा
गायत्रीत्रिविधामता ॥ तत्रैकप्रणवाद्यान्त्या गृहस्थैर्ब्रह्मचारिभिः ॥ गृहस्थोब्रह्मचारीच प्रणवाद्यामिमांजपेत् ॥ अंतेयःप्रणवंकुर्यान्नासौवृ
द्धिमवाप्नुयात् ॥ संपुटांचषडोंकारांगायत्रींचजपेद्यतिः ॥ व्यासः ॥ अष्टोत्तरशतंनित्यमष्टाविंशतिरेववा ॥ विधिनादशकंवापित्रिकालेषु
जपेद्बुधः ॥ ततउह्यास्यगायत्रीमुत्तमेत्यनुवाकतः ॥ अयंचगायत्रीजपस्तीरमेत्यस्थलेचित्रासनादौकार्योनतुजले ॥ कदाचिदपिनोविद्वा
न्गायत्रीमुदकेजपेत् ॥ गायत्र्यग्निमुखाप्रोक्तातस्मादुत्थायतांजपेदिति श्रीदत्तधृतगोभिलवचनात् ॥ यत्तु ॥ आर्द्रवासाजलेकुर्यात्तर्पणा
चमनंजपमिति हारीतवचस्तद्गायत्रीजपव्यतिरिक्तजपविषयं ॥ नृसिंहपुराणे ॥ त्रिविधोजपयज्ञः स्यात्तस्यभेदंनिबोधत ॥ वाचिकश्चउ
पांशुश्चमानसस्त्रिविधःस्मृतः ॥ त्रयाणांजपयज्ञानांश्रेयांस्स्यादुत्तरोत्तरः ॥ एतेषांलक्षणान्याहविश्वामित्रः ॥ यदुच्चनीचस्वरितैः शब्दैःस्प
ष्टपदाक्षरैः ॥ मंत्रमुच्चारयेद्वाचावाचिकोयंजपःस्मृतः ॥ शनैरुच्चारयेन्मंत्रमीषदोष्ठौचचालयेत् ॥ अपरैर्नश्रुतःकिंचित्सउपांशुजपःस्मृतः ॥-
धियायदक्षरश्रेण्यावर्णाद्वर्णपदात्पदं ॥ शब्दार्थचिंतनंभूपकथ्यतेमानसोजपः ॥ आसनान्याह ॥ व्यासः ॥ कौशेयंकंबलंचैवअजिनंपट्टमेव
च ॥ दारुजंतालपत्रंवाआसनंपरिकल्पयेत् ॥ कृष्णाजिनेज्ञानसिद्धिर्मोक्षश्रीर्व्याघ्रचर्मणि ॥ वस्त्राजिनेव्याधिनाशः कंबलेदुःखमोचनं

अभिचारेनीलवर्णरक्तंवश्यादिकर्मणि॥ शांतिकेकंबलःप्रोक्तःसर्वेष्टंचित्रकंबले॥वशावश्यामृगीतिव्याख्यातंमयूरके॥जपमालोक्तातंप्रांतरे-
॥अंगुलीगणनादेकंरेखयाष्टगुणंभवेत्॥कुशग्रंथ्याकोटिगुणंरुद्राक्षैःस्यादनंतकं॥अक्षगणनाप्युक्ता प्रजापतिना॥अष्टोत्तरशतंकुर्याच्चतुः
पंचाशिकांस्तथा॥सप्तविंशतिकंवापिततोनैकाधिकावरा॥अवरान्यूनारक्तवर्णैर्मणिभिःकीटरंध्रविवर्जितैः॥अक्षसूत्रंप्रकर्तव्यंगोपुच्छवलयाकृ
ति ॥वक्त्रंवक्त्रेणसंयोज्यपुच्छंपुच्छेनयोजयेत्॥मेरुरूर्ध्वमुखःकार्यःप्रत्येकंनागपाशकं॥पश्चात्तेनजपंकुर्याद्भवेदुक्तफलंप्रिये॥इतिनृसिंह
परिचर्यायां॥अनामामध्यमाक्रम्यजपंकुर्याच्चमानसं॥मध्यमामध्यमाक्रम्यजपंकुर्यादुपांशुकं॥तर्जनींतुसमाक्रम्यजपंनैवहकारयेत्॥ए
केकमणिमंगुष्ठेनाकर्षन्प्रजपेन्मनुं॥मेरौतुलंघितेदेविनमंत्रफलभाग्भवेत्॥प्रमादात्पतितेसूत्रे जपेदष्टोत्तरंशतं॥पादयोःपतितेतस्मिन्प्रक्षा
ल्यद्विगुणंजपेत्॥इतिसूत्रमालाएतच्चगायत्रीजपातिरिक्त जपेज्ञेयं॥उक्तंच॥मालाकरणंब्रह्मयामलेगायत्रीकल्पेच॥पर्वभिस्तुजपेद्देवीं
मालाकाम्यजपेस्मृता॥गायत्र्यामूलवेदत्वाद्वेदःपर्वसुगीयते॥ आरभ्यानामिकामध्यंपर्वाण्युक्तान्यनुक्रमात्॥तर्जनीमूलपर्यंतंजपेद्दशसुप
र्वसु॥मध्यमांगुलिमूलेतुयत्पर्वद्वितयंभवेत्॥तंवैमेरुंविजानीयाज्जपे तंनातिलंघयेत्॥मोडःस्मृतं॥आरभ्यानामिकामूलात्प्रादक्षिण्येनवैक्र
मात्॥मध्यमामूलपर्यंतंजपेद्दशसुपर्वसु॥रुद्रमनुः॥वस्त्रेणाच्छादितकरंदक्षिणंयःसदाजपेत्॥तस्यस्यात्सफलंजाप्यंतद्धीनमफलंस्मृतं
अतएवतिर्यक्संचिकाकल्पिताकेनचिद्बुद्धिमताद्ददेनजपशीलेन॥जपार्थंसाचगोमु खीतिव्यवह्रीयतेलोकैस्तस्यास्त्वन्यत्किंचिन्मूलंनपश्या

मः ॥ अथोपस्थानं ॥ शौनकः ॥ सायंप्रातरुपस्थानंकुर्यान्मंत्रैर्यथाक्रमं ॥ जातवेदसइत्येकानच्छंयोरावृणीमहे ॥ नमोब्रह्मणइत्येतेरुपतिष्ठेद्दिशांप्रति
तत्रैवप्रातः सूर्यमुपस्थायमित्रस्यचर्षणीधृतइति ॥ भगवान्त्र्यंबकमिति मंत्रेणनमोब्रह्मणइत्यथ ॥ मित्रस्यचर्षणी   द्वाभ्यांप्रातः काले-
विशेषनइति ॥ गृह्यपरिशिष्टे ॥ प्रदक्षिणंदिशः साधिपा नत्वासंध्यायैनमः ॥ सावित्र्यैनमोगायत्र्यैनमः सर्वाभ्योदेवताभ्योनमस्कृत्य ॥ ततः ॥ उ-
त्तमेशिखरेदेवीभूम्यांपर्वतमूर्धनि ॥ ब्राह्मणेभ्योभ्यनुज्ञातागच्छदेवियथासुखमितिसंध्याविसर्ज्यभद्रंनो अपिवातयमन इत्यस्याशांतिंवक्त्रिरुच्चा
र्यप्रदक्षिणं परिक्रामन्नासत्यलोकात्पातालादालोकालोकपर्वतात् येसंतिब्राह्मणादेवास्तेभ्योनित्यं नमोनमइतिनमस्कृत्यभूमिमुपसंगृ
ह्यगुरून्वृद्धांश्चोपसंगृण्हीयादेवंसायं ॥ अथप्रयोगः ॥ आसनेउपविश्याचम्यब्रह्मचारीकनिष्ठानामिकांगुष्ठैर्गृहस्थः पंचांगुलीभिर्नासाध
स्तावामरंध्रेणवायुमापूर्यनिरोधेनकुंभकेकृते ॥ प्रणवस्यपरब्रह्मऋषिः ॥ परमात्मादेवता दैवीगायत्रीछंदः ॥ सप्तानांव्याहृतीनांविश्वामि
त्रजमदग्निभरद्वाजगौतमात्रिवसिष्ठकश्यपा ऋषयः ॥ अग्निवाय्वादित्यबृहस्पतिवरुणेंद्रविश्वेदेवादेवताः ॥ गायत्र्युष्णिगनुष्टुप्बृह तीपं
क्तित्रिष्टुब्जगत्यश्छंदांसि ॥ गायत्र्याविश्वामित्रऋषिः ॥ सवितादेवता ॥ गायत्रीछंदः ॥ गायत्रीशिरसः प्रजापतिर्ऋषिः ॥ ब्रह्माग्निवा
य्वादित्यादेवताः ॥ यजुश्छंदः ॥ प्राणायामेविनियोगः ॥ ॐ भूः ॥ ॐ भुवः ॥ ॐ स्वः ॥ ॐ महः ॥ ॐ जनः ॥ ॐ तपः ॥ ॐ सत्यं ॥ ॐ तत्स-
वितुर्वरेण्यंभर्गोदेवस्यधीमहि ॥ धियोयोनः प्रचोदयात् ॥ ॐ आपोज्योतीरसोमृतंब्रह्मभूर्भुवस्वरोम् ॥ एवंनिरुध्यदक्षिणरंध्रेणवायु-

शनैर्विसृज्याचम्यममउपात्तदुरितक्षयद्वाराश्रीपरमेश्वरप्रीत्यर्थंप्रातः संध्यामुपासिष्येइतिसंकल्प्यापोहिष्ठेतिनवर्चेनप्रथममार्जनंकुर्यात् ॥ तन्त्रे
र्थं ॥आपोहिष्ठेतित्र्यृचस्यांबरीषः सिंधुद्वीप आपोगायत्री ॥ मार्जनेविनियोगः ॥ ॐ आपोहिष्ठामयोभुवः ॥ ॐ तानऊर्जेदधातनं ॥ ॐ महे
रणायचक्षसे ॥ ॐ योवः शिवतमोरसः ॐ तस्यभाजयतेहनः ॐ उशतीरिवमातरः ॐ तस्माअरंगमामवः ॐ यस्यक्षयायजिन्वथ ॐ
आपोजनयथाचनः ॐ इतिप्रणवयुतैर्नवभिः पादैः शिरोमार्जयित्वामंत्राचमनंकुर्यात् ॥ हस्तेजलमादाय ॥ सूर्यश्चेतियाज्ञवल्क्यउपनि
षदऋषिःसूर्यमामन्युमन्युपतिरात्रयोदेवताः ॥ प्रकृतिश्छंदः ॥ मंत्राचमनेविनियोगः ॐ सूर्यश्चमामन्युश्चमन्युपतयश्चमन्युकृतेभ्यः ॥पा
पेभ्योरक्षंतां॥यद्रात्र्यापापमकार्षं॥ मनसावाचाहस्ताभ्यां ॥ पद्भ्यामुदरेणशिश्ना॥रात्रिस्तदवलुंपतु॥ यत्किंचदुरितंमयि ॥ इदमहंमाममृतन
योनौ ॥ सूर्येज्योतिषि जुहोमिस्वाहेतिजलंपीत्वा ॥आचम्य ॥ समस्तव्याहृतीनांप्रजापतिर्ऋषिः ॥ प्रजापतिर्देवता ॥ बृहतीच्छंदः ॥ गायत्र्या
विश्वामित्रऋषिः ॥ सवितादेवता ॥ गायत्रीच्छंदः ॥ मार्जनेविनियोगः ॐ भूर्भुवःस्वरितिद्वितीयं ॐ तत्सवितुरितिचगायत्र्यावृतीयंच
त्वा आपोहिष्ठेतिनवर्चेनचतुर्थमार्जनंकुर्यात् ॥ आपोहिष्ठेतिनवर्चस्यसूक्तस्यांबरीषःसिंधुद्वीपआपोगायत्री ॥ पंचमीवर्धमाना सप्तमी
प्रतिष्ठा अंत्येद्वेअनुष्टुभौ ॥ मार्जनेवि॰ ॥ ॐ आपोहिष्ठामयोभुवस्तानऊर्जेदधातना महेरणायचक्षसे योवःशिवतमोरसस्तस्यभा
जयतेहनः उशतीरिवमातरः तस्माअरंगमामवोयस्यक्षयायजिन्वथ ॥ आपोजनयथाचनः ॥ ॐ शन्नोदेवीरभिष्टय आपोभवंतुपी

तये शंयोरभिस्रवंतुनः ॥ ॐ ईशानावार्याणांक्षयंतीश्चर्षणीनां आपोयाचामिभेषजं ॥ ॐ अप्सुमेसोमोअब्रवीदंतर्विश्वानिभेषजा अ
ग्निंचविश्वशंभुवं ॥ ॐ आपः पृणीतभेषजंवरूथंतन्वे ३ मम ज्योक्चसूर्यंदृशे ॥ ॐ इदमापःप्रवहतयत्किंचदुरितंमयि यद्वाहमभिदुद्रोह
यद्वाशेपउतानृतं ॥ ॐ आपो अद्यान्वचारिषंरसेनसमगस्महि पयस्वानग्नआगहितंमासंसृजवर्चसेति प्रत्यर्धंच मोंकारपूर्वकंशिरसिमा
र्जनंकृत्वाघमर्षणंकुर्यात् ॥ गोकर्णाकारंजलपूर्णंचुलकंनासिकांतंनीत्वाप्राणंनिरुध्य ॥ ऋतंचेतित्र्यृचस्याघमर्षणऋषिः ॥ भाववृत्तोदेवता अनु
ष्टुप्छंदः अघमर्षणेविनियोगः ॐ ऋतंचसत्यंचाभीद्धात्तपसोध्यजायता ततोरात्र्यजायनततः समुद्रोअर्णवः समुद्रादर्णवादधिसंवत्सरो
अजायता ॥ अहोरात्राणि विदधद्विश्वस्यमिषतोवशी ॥ सूर्याचंद्रमसौधातायथापूर्वमकल्पयत् दिवंचपृथिवींचांतरिक्षमथोस्वः इतिजपि
त्वादक्षिणनासाबिलात्पापपुरुषंनिःसारितंभावयन्वामभागेजलंक्षिपेत् ॥ आचम्य पूर्णोदकांजलिरादित्याभिमुखस्तिष्ठन्गायत्र्याविश्वामित्र
ऋषिः ॥ सवितादेवता गायत्रीछंदः अर्घ्यदानेविनियोगः ॥ ॐ भूर्भुवः स्वरितिव्याहृतिपूर्वांसावित्रींपठित्वाश्रीसूर्यायेदमर्घ्यं समर्पयामि
इतिजलमूर्ध्वंक्षिपेत् ॥ एवंत्रिः कृत्वा असावादित्योब्रह्मेत्यात्मानंपरिषिच्यगायत्रींजपेत् ॥ कुशोदकेनजपस्थानंप्रोक्ष्यासनंविन्यस्य ॥ ॐ भूर्भु
वःस्वरोमितिजपित्वासनेपद्मासनेनोपविश्य ॥ पृथ्वीत्वयाधृतालोकादेवित्वंविष्णुनाधृता त्वंचधारयमांदेविपवित्रंकुरुचासनं ॥ अपसर्पंतु
तेभूतायेभूताभूमिसंस्थिताः ॥ येभूताविघ्नकर्तारस्तेगच्छंतुशिवाज्ञया ॥ अपक्रामंतुभूतानिपिशाचाः सर्वतोदिशं सर्वेषामविरोधेनब्रह्म

कर्मसमार मेदति मू तरफ हिंडवावम्यमाणायामंत्रयेद्ध त्वापुनरावम्यात्मानंव्यात्ट तिभिरभ्यक्षस्यगायत्र्याविश्वामित्रऋषिः सवितादेवता गायत्रीछंदः गायत्रीजपेविनियोगः ॐ तत्सवितुर्हृदयायनमः ॥ वरेण्यंशिरसेस्वाहा ॥ भर्गोदेवस्यशिखायैवषट् ॥ धीमहीकवचायहुं ॥ धियोयोनःनेत्रत्रयायवौषट् ॥ प्रचोदयात् अस्त्रायफट् ॥ अस्त्रेणैवदिग्बंधनंकृत्वादेवतांध्यायेत् ॥ बालांबालादित्यमंडलमध्यस्थांरक्तवर्णांरक्तांबरानुलेपन स्रगाभरणांचतुर्वक्त्रांदंडकमंडल्वक्षसूत्राभयांकचतुर्भुजां हंसासनारूढांब्रह्मदैवत्यामृग्वेदमुदाहरंतीं भूर्लोकाधिष्ठात्रींगायत्रींनामदेवतांध्यात्वा ॥ आगच्छवरदेदेविजपेमेसंन्निधौभव ॥ गायंतंत्रायतेयस्माद्गायत्रीतेनसोच्यते इत्यावाह्य ॥ मनसासंपूज्याष्टोत्तरसहस्रमष्टोत्तरशतमष्टाविंशतिवा ॥ आपत्तौदशवारंवागायत्रींजपित्वापुनः षडंगन्यासंविधायोपस्थानंकुर्यात् जातवेदसेमारीचः कश्यपोजातवेदा अग्निस्त्रिष्टुप् ॥ उपस्थानेविनियोगः ॐ जातवेदसेसुनवामसोममराती यतोनिदहातिवेदः सनः पर्षदतिदुर्गाणिविश्वानावेवसिंधुंदुरितात्यग्निः ॥ मित्रस्येतिचतसृणांगाथिनोविश्वामित्रोगायत्री ॥ उपस्थानेवि॰ ॥ ॐ मित्रस्यचर्षणीधृतोवोदेवस्यसानसि द्युम्नंचित्रश्रवस्तमं अभियोमहिनादिवंमित्रोबभूवसप्रथाः अभिश्रवोभिः पृथिवीं मित्रायपंचयेमिरे जना अभिष्टिशवसे सदेवान्विश्वान्बिभर्ति मित्रोदेवेष्वायुषुजनायवृक्तबर्हिषे इषइष्टव्रताअकः त्र्यंबकंवसिष्ठोरुद्रोनुष्टुप् उपस्थानेविनियोगः ॥ ॐ त्र्यंबकंयजामहेसुगंधिंपुष्टिवर्धनं उर्वारुकमिवबंधनान्मृत्योर्मुक्षीयमामृतात् तच्छंयोः शंयुर्विश्वेदेवाः शक्वरी उपस्थानेविनियोगः ॥ ॐ तच्छंयोरावृणीमहेगातुंयज्ञायगातुंय-

ज्ञपतयेदेवीस्वस्तिरस्तुनः स्वस्तिर्मानुषेभ्यः ऊर्ध्वंजिगातुभेषजंशन्नो अस्तुद्विपदेशंचतु ष्पदे ॥ नमोब्रह्मणेप्रजापतिर्विश्वेदेवाजगती ॥ उपस्था-
नेवि॰ ॐ नमोब्रह्मणेनमो अस्त्वग्नयेनमः पृथिव्यैनमओषधीभ्यः नमोवाचेनमोवाचस्पतयेनमोविष्णवेमहतेकरोमि ॥ नमः प्राच्यैदिशेयाश्च देवताः
एतस्यांप्रतिवसंतिताभ्यश्चनमः नमोदक्षिणस्यैदिशेयाश्च॰ नमः प्रतीच्यैदिशेया॰ नमोउदीच्यैदिशेया॰नमऊर्ध्वायैदिशेया॰ नमोधरायैदिशेया
श्च॰ नमोवांतरायैदिशेया॰ ॥ संध्यायैनमः ॥गायत्र्यैनमः ॥ सावित्र्यैनमः ॥ सरस्वत्यैनमः ॥सर्वाभ्योदेवताभ्योनमोनमः ॥ कामोकार्षीन्मन्युर
कार्षीन्नमोनमः ॥उत्तमेशिखरेजातेभूम्यांप र्वतमूर्धनि ॥ ब्राह्मणेभ्योभ्यनुज्ञातागच्छदेवियथासुखं भद्रन्नो अपिवातयमनः ॐ शांतिरितित्रि
रुक्त्वा प्रदक्षिणंपरिक्रामन्नासत्यलोकात्पातालादालोकालोकपर्वतात् येसंतिब्राह्मणादेवास्तेभ्योनित्यंनमोनमइतिगुरूनभिवादयेत् ॥ स्वस्ति
काकारहस्ताभ्यांकर्णौस्पृष्ट्वा ॥ आंगिरस बार्हस्पत्य भारद्वाजेतित्रिप्रवरान्वित भारद्वाजगोत्रोत्पन्नोहं श्रीधरशर्माभोगुरोत्वामभिवादयामि
इतिस्वस्वप्रवरानुच्चार्याभिवाद्यद्विराचमनंकुर्यादिति ॥ अथौपासनंदक्षः ॥ संध्याकर्मावसानेतुस्वयंहोमोविधीयते ॥स्वयंहोमेफलंयत्स्यात्तदन्येन
नलभ्यते अशक्तंप्रत्याह ॥ सएव ॥ ऋत्विक्पुत्रोगुरुर्भ्राताभागिनेयोथविट्पतिः ॥ एतैरपिहुतंयत्स्यात्तद्धुतंस्वयमेवतु ॥ पत्नीकन्यानजुहुया
द्बुनापर्युक्षणक्रियामिति ॥ विट्पतिर्जामाता ॥ आश्वलायनः ॥ स्वयंपत्यपिवापुत्रःकुमार्यंतेवासीवेति अत्र ऋत्विगादिना आसमक्षंतुदंपत्यो
र्होतव्यंनर्त्विगादिनाद्वयोरप्यसमक्षंमेहुतमनर्थकं सन्निधौयजमानः स्यादुद्देशत्यागकारकः ॥ असंनिधौतुपत्नीस्यादुद्देशत्यागकारिका

असंनिधौतुपत्न्याःस्यादध्वर्युस्तदनुज्ञया उन्मादेप्रसवेनक्तौकुर्वीतानुज्ञयाविनेति ॥कात्यायनोक्तेः उभयोः समक्षंहोतव्यमितिमुख्यः कल्पो न्यतरसंनिधौत्वनुकल्पः द्वयोरप्यसमक्षंहुतंव्यर्थंस्यात् ॥शातातपः ॥श्रौतंपत्न्यास्स्वयंकुर्यादन्योपिस्मार्तमाचरेत् ॥ अशक्तोश्रौतमप्य न्यः कुर्यादन्वारमंततः पर्वणितुसायंहोमः ॥प्रतिपत्प्रातर्होमश्चस्वयमेवकार्योनर्त्विगादिना ॥स्वयंपर्वणिजुहुयादृत्विजामेकइतरं कालमितिसूत्रात् अत्रसायमुपक्रम्यप्रातरपवर्गप्रयुज्यते ऋत्विजामेकः कश्चिदृत्विगितरस्मिन्कालेग्निहोत्रहोमंकुर्यादित्यर्थः अत्रापिहोम करणासमर्थस्यप्रतिनिधिनाहोमोज्ञेयः ॥भरद्वाजः ॥होमंवैतानिकंकृत्वास्मार्तंकृत्वाविचक्षणः ॥ स्मृतीनांवेदमूलत्वात्स्मार्तेकेचित्पुराविदुरिति अग्निप्रादुष्करणमपिकात्यायनः सूर्येतुशैलमप्राप्तेषड्विंशाद्भिरिहांगुलैः ॥प्रादुष्करणंमग्नीनांप्रातर्भासामदर्शने प्रादुष्करणंम ग्निप्रज्वलनंअस्यानुकल्पकर्तॄनाह ॥सएव ॥ दुहित्रास्नुषयावाग्निविहारोनविरुध्यते ॥ निर्लेपनंचपात्राणामुपलेपनमर्चनमिति विहा रोविहरणं प्रादुष्करणमितियावत् प्रादुष्करणकालात्ययेसमस्तव्याहृतिभिरेकाज्याहुतिः कार्यातथाचकारिका ॥प्रायश्चित्तविशेषेणाय त्रनोक्तःसर्वत्रविधिः होतव्याज्याहुतिस्तत्रभूर्भुवः स्वरितीतिचेति ॥ अथहोमकालः ॥ कात्यायनः ॥ यावत्सम्यङ्नभात्यंतेनभस्यृक्षाणिसर्वतः लोहितत्वंचनापैतितावत्सायंतुहूयते ॥आचार्योपि सम्यङ्म्लोनतिरवौसायंचजुहुयुस्तदा ॥अथप्रातर्हुते [illegible]दितेर्के यथाविधीति मनुः ॥ उदितेनुदितेचैवसमयाध्युषितेतथा ॥ सर्वथावर्ततेयज्ञइतीयंवैदिकीश्रुतिरिति ॥ एषांस्वरूपंछंदोगप[illegible] ॥[illegible]

रश्मिभिस्तु दिवाकरः ॥ उदितं तं विजानीयात्तत्र होमं प्रकल्पयेत् ॥ रात्रेस्तु षोडशे भागे ग्रहनक्षत्रभूषिते ॥ कालं त्वनुदितं ज्ञात्वा होमं कुर्याद्विच-
क्षणः ॥ प्रभातसमये तीते नष्टे नक्षत्रमंडले ॥ रविर्यावन्न दृश्येत समयाध्युषितं च तदिति ॥ आह सूत्रकारः प्रदोषांतो होमकालः संगवांतः प्रात
स्तमतिनीय चतुर्गृहीतमाज्यं जुहुयाद्यदि सायं दोषावस्तर्नमः स्वाहेति यदि प्रातः प्रातर्वस्तर्नमः स्वाहेत्यग्निहोत्रमुपसाद्य भूर्भुवः स्वरिति जपि
त्वा वरं दत्वा जुहुयादिति ॥ अत्र वृत्तिकृदाह ॥ प्रदोषो नाम रात्रेः पूर्वश्चतुर्थः प्रदोषस्य अंतः प्रदोषांतः प्रदोषांतो तो यस्य सः प्रदोषांतांतः प्रदोषांतां
त इत्यर्थः स सायंहोमस्य कालः केषांचित्पंचमी षष्ठ्यौ नाडिके प्रदोषशब्दे नोच्यते ॥ तदंतो वा सायंहोमकालः संगवांतः प्रातरिति ॥ यस्मिन्का
ले गावो वत्सैः सह आयंते स संगवः कालः तावत्पर्यंतं प्रातर्होमसमयः ॥ केचिदन्हस्तृतीयभागः संगव इत्याहुः ॥ तदंतः संगवांतः दशनाडि
का इत्यर्थः अस्तमिते उदिते च विहिते होम एव तावति काले क्रियमाणे तीतकालो न भवतीति पुनः कालविधिस्तमतिनीय चतुर्गृहीतमाज्यं जुहु
यादिति प्रायश्चित्तं विना कृतमप्यकृतमित्याह पुलस्त्यः ॥ अकाले यत्कृतं कर्म कालं प्राप्य पुनः क्रियाः कालातीतं तु यत्कुर्यादकृतं तद्धि निर्दिशेदि
ति ॥ अकाले अनागतकाले कालातीतं प्रायश्चित्तरहितं कुर्याच्चेदकृतमेवेत्यर्थः ॥ दर्शपूर्णमासस्थालीपाकयोरपि ज्ञेयः तत्र प्रायश्चित्तं त्व
नावृत्कं ॥ अग्नये पथिकृते पुरोळाशं निर्वपेद्यो दर्शपूर्णमासयाजी सन्नमावास्यां पौर्णमासीं वातीयेदत्यादिति ॥ एतदपि यावदन्यस्य पर्वणो न
कालस्तत्प्राप्तौ तु प्रायश्चित्तमेव न पुनः पुनरिति पन्नानुष्ठानं अधिकारांतराविरोधेन पूर्वाधिकारनिवृत्तेः ॥ उक्तं च भाष्यकारेण ॥ ततो दर्शपू-

र्णमासंवायावदन्योनपर्वकालइति अत्रसर्वत्रहविरुत्पादनारोगजात मपिहोमकालएवकार्यं ॥ योहोम . कालः सोंगानामित्यापस्तं बस्म
रणात् ॥ अथहोमद्रव्यसंस्कारादिकारिकायां ॥ पयःप्रभृतिषुत्वेकंसंस्कुर्यादग्निहोत्रवत् ॥ अलंकरोतिगंधाद्यैरनलायतनंवतः द्रवेहविः
स्रुवेणैवपाणिनाकठिनंहविः जुहुयादग्नयेस्वाहास्रुसमिद्धेहुताशने ॥ ध्यात्वाशब्दंचतुर्थ्यंतं प्रजापतयइत्यथ ॥ स्वाहाकारेणजुहुयात्ततः
परिसमूहनं पर्युक्षणंचकुर्वीतप्रातरप्येवमिष्यते व्युष्टायांज्वलयेदेनंसायंहोमः कृतः पुरा पयसान्येनवाप्रातस्तेनैवस्याहद्दृश्निस्कृत् ॥ पू
र्वमंत्रस्तुसूर्यायस्वाहेत्यन्यत्समंभवेदिति ॥ होमेउत्तराहुतिहवनप्रकारमाह ॥ सूत्रकारः ॥ उत्तरांतूष्णींभूयसीमसंसृष्टांप्रागुदग्वुत्तरतोवा-
प्रजापतिंमनसाध्याये त्तूष्णींहोमेषुसर्वत्रेति ॥ विष्णुः ॥ बहुशुष्कें धनेचाग्नौसुसमिद्धेहुताशने विधूमेलेलिहानेचहोतव्यं कर्म सिद्धये
योनर्चिषिजुहोत्यग्नौव्यंगारेन्वैवमानवः ॥ मंदाग्निरामयावीचदरिद्रश्चापिजायते ॥ अग्निसमिंधनंमुखेनकार्यं तदुक्तंसंग्रहे धमनीयंतं
कृत्वातृणंवाकाष्ठमेवच मुखेनाग्निंसमिंधीतमुखादग्निरजायतेति ॥ अत्राहुतिक्षेपणात्पूर्वं समिधमग्नावादध्यात् जान्वाच्यसमिधंमादध्या
त्सदीप्तांगुलमात्रेभिजुहुयादितिसूत्रात् ॥ होम्यानिगृह्यपरिशिष्टे ॥ पयोदधिसर्पिर्यवागुरोदनतंदुलाः सोमस्तंदुलमापोव्रीहयोयवा-
स्तिलाइतिहोम्यानि यवागुरोदनयोः श्रपणंतुलौकिकेग्नौकार्यं यवागुरोदनेतिसिद्धस्यनिर्देशात् ॥ बौधायनः ॥ व्रीहीणांवायवानांवाशत
माहुतिरिष्यतइति ॥ संग्रहे ॥ द्रवंहविस्स्रुवेणैवपाणिनांकठिनंहविः अंगुल्यग्रैर्नहोतव्यंनकुर्यादंगुलिभेदनं ॥ अंगुल्युत्तरपार्श्वेण

होतव्यमितितुस्मृतिरिति उपस्थानेमंत्रानाहशौनकः ॥ परिसमुत्य पर्युक्ष्याप्युपतिष्ठेद्द्विभर्जं ॥ अग्नेः सूक्तेश्चसोरैश्च प्राजापत्यैश्चनित्यशः
अग्निंप्रजापतिंसायंप्रातः सूर्यंप्रजापतिं ॥ अग्न आयूंषीतितिसृभिर्द्वाभ्यामग्नेत्वमित्यथ ॥ सूर्योनइतिमंत्रेणत्युदुत्यंचद्वितीयया ॥ तृती
ययाचित्रमितिनमोमित्रस्यचान्यया ॥ प्रजापतेनत्वदेतान्तंतुंतन्वन्द्वितीयया ॥ हिरण्यगर्भः समितित्युपनिष्ठेद्धुताशनमिति ॥ एतत्परिच
रणमायतनेस्थंडिलेवा अग्निंप्रतिष्ठाप्यकार्यं ॥ कुंडेवास्थंडिलेवापिइतिवचनात् आयतननिर्माणप्रकारः संग्रहे ॥ अरत्निमात्रमग्न्यर्थेका
र्यमायतनंबुधैः ॥ पिश्नीत्नमात्रमित्येके तदप्यंसांतरंभवेदिति ॥ अरत्निः सार्धद्वाविंशत्यंगुलात्मकः अरत्निशब्देनहस्तोपिग्राह्यः ॥ न
पंचारत्निः पुरुषोभवतीतिश्रुत्याअरत्निशब्दस्यहस्तपरदर्शनात् अतएव अस्मन्मातुः पितामह श्रीनारायणभट्टचरणैः प्रयोगरत्नेचतु
र्विंशत्यंगुलंसार्द्धद्वाविंशत्यंगुलंप्रमाणंषोडशांगुलप्रमाणं वायतनमित्युक्तं ॥ अत्रयद्यप्यातनस्यमेखलादिकनप्रोक्तं तथापितच्छ्रौताग्निकुंडे कर्त्त
व्यं ॥ तद्यथा अष्टादशांगुलंकुंडंविंशत्यंगुलमेववा ॥ चतुर्विंशत्यंगुलंचषट्त्रिंशदंगुलात्मकं ॥ श्रौतायतनविस्तारोमेखलैकातदर्धतः च
तुर्थांशो द्वितीयास्याद्विस्तृताचतुरंगुला ॥ चतुर्थांशोर्विस्तार चतुर्थांशोरित्यर्थः ॥ द्वितीयाविस्तृताकार्या द्व्यंगुलातंत्रवेदिभिः अयंद्विमेख
लापक्षः कात्यायनातिरिक्तानां तेषांत्वेकमेखलापक्षएव ॥ तदुक्तंशुल्बे ॥ द्वादशांगुलमुच्छ्रायोविस्तारश्चतुरंगुलः ॥ एकैवमेखलाप्रो
क्ताकात्यायनमतेकिल ॥ द्वितीयमेखलोच्छ्राय विस्तारौतुतदर्धतः ॥ कात्यायनातिरिक्तानांमेखलाद्वयमुच्यतइति ॥ अथौपासनप्रयो

ग: ॥ आयतनेस्थंडिलेवाप्रादुष्कृतस्याग्नेः पश्चात्कृतसंध्यावंदनो गृहीउपविश्यप्राणानायम्यदेशकालौनिर्दिश्यश्रीपरमेश्वरप्रीत्यर्थं सायंप्रा
पासनहोमंकरिष्ये इतिसंकल्प्य ॥ चत्वारिश्रृंगागौतमोवामदेवोग्निस्त्रिष्टुप् ॥ अग्निमूर्तिध्यानेविनियोगः ॥ ॐ चत्वारिश्रृंगात्रयो अस्यपादाद्वेशी
र्षेसप्तहस्तासोअस्य ॥ त्रिधाबद्धोवृषभोरोरवीति ॥ महोदेवोमर्त्याआविवेश ॥ इतिध्यात्वाग्नेरीशानींदिशमारभ्यप्रदक्षिणंसमंतात्सोदके
नदक्षिणेनपाणिना ॥ त्रिःपरिसमुह्यकुशैःपरिस्तीर्य त्रिःपर्युक्ष्यप्रागुक्तद्रव्यमध्येयत्किंचिद्द्रव्यंपात्रेकृत्वानत्पात्रमुत्तरतोग्नेर्निधायज्वल
तादर्भेणावज्वाल्यप्रोक्ष्यतेनैवोल्मुकेनत्रिःपर्यग्निकृत्वातदुल्मुकंनिरस्यापः स्पृष्ट्वाग्नेः पश्चाद्दर्भेषुसमिधासहद्रव्यंनिधाय ॥ विश्वानि
नइतित्र्यृचस्य आत्रेयोवसुश्रुतोग्निस्त्रिष्टुप् ॥ द्वाभ्यामर्चनेअंत्योपस्थानेवि० ॥ ॐ विश्वानिनोदुर्गहाजातवेदः ॥ ॐ सिंधुंननावा
दुरितातिपर्षि ॥ ॐ अग्नेअत्रिवन्नमसागृणानः ॥ ॐ अस्माकंबोध्यवितातनूनां ॥ ॐ पस्त्वाद्द्वारीरिणामन्यमानः ॥ ॐ अमर्त्यंमि
त्र्योजोहवीमि ॥ ॐ जातवेदोयशोअस्मासुधेहि ॥ ॐ प्रजाभिरग्नेअमृतत्वमश्यां ॥ ॐ यस्मैत्वंसुकृतेजातवेदउलोकमग्नेकृणवस्यो
नं ॥ अश्विनंसपुत्रिणंवीरवंतंगोमंतंरयिंनशतेस्वस्ति ॥ इतिदक्षिणंजान्वाच्यसमिधमग्नौक्षिप्त्वापः स्पृष्ट्वासमिधिप्रदीप्तायांविधूमज्वालां
गारेग्नौकठिनंहविः पाणिनांगुल्युत्तरपर्वेनद्रवंहविः स्रुवेणसमिन्मूलतोद्व्यंगुलप्रदेशेसव्यंपाणिंहृदिनिधाय ॥ ॐ अग्नयेस्वाहा इतिहुत्वा
अग्नयइदंनममेतिसर्वत्रपूर्वाहुतिरैशान्यांउत्तरस्यांवापूर्वाहुतेर्भूयसीमाहुतिंप्रजापतिपदंचतुर्थ्यंतंमनसाध्यायन्स्वाहेत्यपांशुच्चार्यास

स्रुष्टांहुत्वा प्रजापतयइदंनममेतित्यक्त्वा परिस्तरणंविसृज्यपरिसमूहनपर्युक्षणेकृत्वोपस्थानंकुर्वंति ॥ तत्रमंत्राः॥ अग्नआयूंषीतिमंत्रत्र
यस्यशतंवैखानसाः पवमानोग्निर्गायत्री ॥ अग्न्यु पस्थानेवि०॥ॐ अग्नआयूंषिपवसआसुवोर्जमिषंचनः ॥आरेबाधस्वदुच्छुनां ॥अग्नि
र्ऋषिः पवमानः पांचजन्यःपुरोहितः ॥ तमीमहेमहागयं ॥ अग्नेपवस्वस्वपा अस्मेवर्चः सुवीर्यं ॥दधद्रयिंमयिपोषं ॥ अग्नेत्वन्नइतिचत
सृणांगोपायनालोपायनावाबंधुः स्रुबंधुश्रुतबंधुर्विप्रबंधुः क्रमेणाग्निर्द्विपदाविराट् अग्न्युपस्थानेविनियोगः ॥ॐ अग्नेत्वन्नोअंत
मउतत्राताशिवोभवावरूथ्यः ॥ वसुरग्निर्वसुश्रवा अच्छानक्षिद्युमत्तमंरयिंदाः ॥ सनोबोधिश्रुधीहवमुरुष्याणो अघायतः समस्मात्
तंत्वाशोचिष्ठदीदिवः सुम्नायनूनमीमहेसखिभ्यः ॥ प्रजापतेहिरण्यगर्भः प्रजापतिस्त्रिष्टुप् ॥ प्रजापत्युपस्थानेविनियोगः ॥ॐ
प्रजापतेनत्वदेतान्यन्योविश्वाजातानिपरिताबभूव। यत्कामास्तेजुहुमस्तन्नोअस्तुवयंस्यामपतयोरयीणां ॥ तंतुंतन्वंदेवा अग्निर्जगती
अग्न्युपस्थानेविनियोगः ॥ॐ तंतुंतन्वन्रजसोभानुमन्विहि ज्योतिष्मतः पथोरक्षधियाकृतान् ॥ अनुल्बणंवयतजोगुवामपोमनु
र्भवजनयादैव्यंजनं ॥ हिरण्यगर्भइत्यस्यहिरण्यगर्भः प्रजापतिस्त्रिष्टुप् ॥ प्रजापत्युपस्थानेविनियोगः ॥ॐ हिरण्यगर्भः समवर्त
ताग्रेभूतस्यजातः पतिरेकआसीत् ॥ सदाधारः पृथिवींद्यामुतेमांकस्मैदेवायहविषाविधेम ॥ एतैर्मंत्रैर्वायव्यदेशेप्रह्वस्तिष्ठन्नुप
तिष्ठेत् ॥ ततउपविश्य ॥ मानस्तोकेतिकुत्सोरुद्रोजगती ॥ विभूतिग्रहणेविनियोगः॥ॐ मानस्तोकेतनयेमानआयौमानोगोषुमा

नोअस्ते षुरीरिषः ॥वीरान्मानोरुद्रभामितोवधीर्हविष्मंतः सदमित्वाहवामहे ॥त्र्यायुषंजमदग्नेरितिललाटे ॥कश्यपस्यत्र्यायुषंकंठे ॥अग
स्त्यस्यत्र्यायुषंनाभौ ॥यद्देवानांत्र्यायु॰दक्षिणस्कंधे ॥तन्नोअस्तुत्र्या॰वामस्कंधे ॥सर्वमस्तुशतायुषंशिरसि ॥न्यूनातिरिक्तदोषपरिहा
रार्थं ॥प्रमादात्कुर्वतांकर्मप्रच्यवेताध्वरेषुयत् ॥स्मरणादेवतद्विष्णोः संपूर्णंस्यादितिश्रुतिरितिवचनाद्विष्णुंस्मृत्वाकर्मेश्वरार्पणंकृत्वाइ
तिसायमौपासनप्रयोगः ॥एवमेवप्रातरपिपूर्वांगानिकृत्वा ॥ सूर्यायस्वाहेतिसायंद्रव्येणैवप्रथमाहुतिंहुत्वासायंकालीन द्विती
याहुतिवद्द्वितीयाहुतिंहुत्वापरिसमूहनादिसर्वंप्राग्वत्कुर्वीत ॥उपस्थानेविशेषः ॥सूर्योनोदिवस्पात्वित्यस्यचक्षुः सूर्योगायत्री॥
सूर्योपस्थानेवि॰॥ॐ सूर्योनोदिवस्पातुवातोअंतरिक्षात् ॥अग्निर्नःपार्थिवेभ्यः ॥उदुत्यंकाण्वःप्रस्कण्वः सूर्योगायत्री॥सूर्योप-
स्थानेवि॰॥ॐउदुत्यंजातवेदसंदेवंवहंतिकेतवः दृशेविश्वायसूर्यं ॥ चित्रंदेवानामांगिरसः कुत्सः सूर्यस्त्रिष्टुप् ॥सूर्योपस्थाने
विनियोगः ॥ॐ चित्रंदेवानामुदगादनीकंचक्षुर्मित्रस्यवरुणस्याग्नेः ॥आप्राद्यावापृथिवीअंतरिक्षंसूर्यआत्माजगतस्तस्थुष
श्च ॥ नमोमित्रस्येतिसौर्योभितपाः सूर्योजगती ॥सूर्योपस्थानेवि॰॥ॐ नमोमित्रस्यवरुणस्यचक्षसेमहोदेवायतदृतंसपर्यत ॥दू
रेदृशेदेवजातायकेतवेदिवस्पुत्रायसूर्यायशंसत ॥एतैश्चतुर्भिः सूर्यप्रजापतेहिरण्यगर्भइतिद्वाभ्यांप्रजापतिंचोपतिष्ठेदितिमात्रविशेषः
॥अथप्रसंगात्किंचिद्दूत्याग्निविषयेप्रोच्यते ॥होमकालेशम्यादेशादर्वाक्बहिरायतनाद्गतश्चेदग्निः सचप्राप्रायश्चित्तसमाप्तिपर्यंतंस्थिति

समर्थस्तदाइदंतएकंपरऊतएकमितिबकूचमंत्रेणायतनेप्रक्षिप्य ॥ व्यस्तसमस्तव्याहृतिभिश्चतस्त्र आज्याहुतीर्जुहुयात् ॥ जीवना-
समर्थः ॥ स्फुलिंगस्म स्तदानदोषइतिभावः ॥ शम्यादेशादपिबहिरुपक्षीयगतेग्नौपथिकृतेग्नयेचरुः कार्योथवा अग्नयेपथिकृते
स्वाहेतिपूर्णाहुतिः कार्या ॥ तदुक्तंकारिकायां ॥ अर्वाक्शम्यापरासात्तुबहिरायतनाद्गतप्रायश्चित्तसमाप्यंतंसमर्थोजीवितुंयदि ॥
इदंतइत्यृचानस्यस्थानेग्निंप्रक्षिपेत्पुनः ॥ आज्याहुतीश्चजुहुयाद्व्याहृत्याख्येश्चपूर्ववत् अतिक्रांतोयदाशम्यापरासमनलोभवेत् ॥
चरुः पथिकृतेकार्यः पूर्णाहुतिरथापिवा ॥ पूर्णाहुतिलक्षणंतत्रैव ॥ आज्यंद्वादशकृत्वस्त्रुग्गृहीत्वापूरयेत्स्रुचं ॥ तयाचाज्याहुतिः
कार्यासापूर्णाहुति रिष्यते ॥ स्रुवपूर्णाहुतिर्वास्यादित्येकेयाज्ञिकाविदुरिति ॥ आयतनात्षट्त्रिंशदंगुलात्मकोदेशः शम्या ॥ शम्याष
ड्विंशदंगुलेत्यापस्तंबस्मरणात् ॥ आयतनभंगेनस्थलसंकोचादिनावास्थलांतरेग्निनयनप्रसक्तौप्रकारउक्तस्त्रिकांडमंडने ॥ प्रत्य-
क्षेणनयन्नग्निंप्रसुत्सृजेच्चेन्नुनश्यतियदिवान्नजुहोतानिधायोत्सृजेत्पुनः हरेदनुत्सृजन्नेवंनश्येत्त्रिर्हरणेनलः शकटेनातिदूरंवाहरे
द्देशंयथारुचि ॥ स्वांगेनवाथवाशम्यापरासात्प्राङ्नयेत्सृजन् ॥ कर्मार्थंनयनेग्नीनांनानुत्सृजासादिचोद्यते ॥ नदीसंतरणेग्नीनांसी-
मातिक्रमणेतथा ॥ सर्वत्राद्यंतसीम्नोर्वास्वामिस्पृष्टास्यकरग्नयः प्रत्यस्मरणिहारं नान्यथाग्निविनाशनमिति ॥ अन्यान्यपि
प्रायश्चित्तानिविस्तारभीत्येहन प्रदर्शितानीतिसंक्षेपः ॥ अथोपवसथ्येवर्ज्यान्याहजाबालिः ॥ कोविदारान्कुलित्थांश्च

र्जयेत्कोद्रवांस्तथा ॥ अनृतंबहुवादंचक्रयविक्रयमेवच ॥ दंतशौचंचपूर्वेद्युर्यागस्यैतानिवर्जयेत् ॥ मसूरान्लवणान्क्षारांश्चणकान्कोरदूषका
न् ॥ माषान्मधुपरान्नंचवर्जयेत्पर्वणिद्विजइति ॥ अथपुनराधाननिमित्तानि ॥ कात्यायनः विहायाग्निंसभार्यश्चेत्सीमामुल्लंघ्यगच्छति ॥ हो
मकालात्ययेतस्यपुनराधानमिष्यते ॥ अत्रसीमागृहसीमानतुग्रामसीमातदुक्तंत्रिकांडमंडनेन ॥ विहारकालेयदिकार्यलोभात्पत्नीतुसी-
मानमतीत्यगच्छेत् ॥ निःसंशयोग्निःखलुनाशमेतिगृहस्यसीमात्रविवक्षितोर्थइति ॥ शौनकः ॥ अप्यावनुगतेयत्रहोमकालद्वयंव्रजेत्
उभयोर्विप्रवासेवालौकिकोग्निर्विधीयते ॥ भगवान्प्रोषितेतुयदापत्नीयदिग्रामांतरंव्रजेत् ॥ होमकालेयदिप्राप्तानसादोषेणयुज्यते ॥
अथतत्रैववसतिहोमकालव्यतिक्रमः ॥ लौकिकोग्निर्विधीयेतकाठकश्रुतिदर्शनात् ॥ पैठीनसिः ॥ २ बली कृतधर्मस्यपीड्यमानस्यशत्रु-
भिः मासद्वयंप्रवासोस्तिपरतोनाहिताग्निवत् मासद्वयस्योपरि आहिताग्नेर नाहिताग्निवत्प्रवासोनास्तीतितुर्यपादार्थः ॥ मासद्वयावधि
प्रवासेहोमार्थेद्विजंपरिकल्प्यप्रवसेदित्याह कात्यायनः ॥ निक्षिप्याग्निंस्वदारेषुपरिकल्प्यर्त्विजंतथा ॥ प्रवसेत्कार्यवान्विप्रोवृथैव
नचिरंवसेदिति ॥ अत्रकार्यवानितिधनार्थीनतुतपोर्थी ॥ धनान्यर्जयितुंयुक्तः प्रवासोत्याग्निहोत्रिणः ॥ धनैर्यत्संभवेदिज्यानतपा
र्थनतुव्रजेदिति सत्यव्रतस्मरणात् ॥ साग्निकविषयेत्रिकांडमंडनआह ॥ अग्निहोत्रेणरहितः पथानंशतयोजनं साग्निस्तुप्रति
यात्येवमग्निहोत्रंविनश्यति ॥ अत्रप्रवासकालेआगमनकालेविशेषस्तथातिपन्नादिहोमकारश्चजागरूकेःस्मन्मातुःपितामह-

श्रीनारायणरचितेप्रयोगरत्नेद्रष्टव्यइतिदिक् ॥ अथपूजाविधिर्मात्स्ये ॥ प्रातर्मध्यंदिनेसायंदेवपूजांसमारभेत् ॥ अशक्तौविस्तरेणै
वप्रातःसंपूज्यकेशवं ॥ मध्यान्हेचैवसायंचपुष्पांजलिमपिक्षिपेत् ॥ स्कांदे ॥ कामासक्तोथवाक्रुद्धः शालिग्रामशिलार्चनात् ॥ भक्त्यावा
यदिवाभक्त्याकलौमुक्तिमवाप्नुयात् ॥ शिलाप्युक्ताप्रयोगपारिजाते ॥ शिलाद्यामलकीतुल्यापूज्यासूक्ष्मैवयाभवेत् ॥ यथायथाशिलासूक्ष्मा
तथास्यात्तुमहत्फलं ॥ तस्यांमांपूजयेन्नित्यंधर्मकामार्थसिद्धयेइति ॥ तत्रैवस्कांदे शिवनाभिरुक्तः ॥ यवमात्रंतुगर्तस्याद्यवार्धंलिंगमुच्यते
शिवनाभिरितिख्यातस्त्रिषुलोकेषुदुर्लभः वासुदेवमयंक्षेत्रं लिंगंशिवमयंस्मृतं ॥ तस्माद्धरिहरक्षेत्रेपूजयेच्छंकराच्युतौ ॥ श्रीभारतेक-
लौकलिमलध्वंसंसर्वपापहरंहरिं ॥ येर्चयंतिनरानित्यंतेपिवंद्यायथाहरिः ॥ ब्रह्माकृतयुगेदेवस्त्रेतायांभगवान्हरिः द्वापरेभगवान्विष्णुः
कलौदेवोमहेश्वरः पूज्यइतिभावः ॥ शिवपूजनंबाणलिंगेतिप्रशस्तमित्युक्तंभविष्ये ॥ बाणलिंगानिराजेंद्रख्यातानिभुवनत्रये ॥ नप्रति-
ष्ठानसंस्कारस्तेषामावाहनंनचेति ॥ हेमाद्रौ ॥ पक्वजंबूफलाकारंकुक्कुटांडसमाकृति भक्तिमुक्तिप्रदंचैवबाणलिंगमुदाहृतं ॥ श्रीसूर्य
पूजोक्ताभविष्यपुराणे ॥ प्रातःसंध्यावसानेतुनित्यंसूर्यंसमर्चयेत् ॥ यःसूर्यंपूजयेद्भक्त्यात्रिमूर्तेःपूजकोभवेत् ॥ अग्निहोत्रादिवेदो-
क्तयज्ञाश्चबहुदक्षिणाः ॥ सूर्यार्चनस्यचैवैतेकोट्यंशेनापिनोसमाः ॥ मेरुमंदारतुल्योपिराशिःपापस्यदारुणः ॥ आराध्यभास्क
रंमर्त्यस्तंनाशयतितत्क्षणात् ॥ प्रदद्याद्धेमगवांलक्षंदोग्ध्रीणांवेदपारगे ॥ एकाहमर्चयेद्भानुं तस्यपुण्यंततोधिकं ॥ गृहस्थस्यपंचाप

तनपूजोक्ता परशुरामनिबंधे कूर्मपुराणे ॥ स्नानंसंध्यांततोहोमंगृहस्थोक्तेन वर्त्मना ॥ कृत्वासूर्यंगणपतिंलक्ष्मीमीशंतथाहरिं ॥ पौरु
षेणतुसूक्तेननित्यमर्चांसमारभेत् ॥ अर्चनंमूलमंत्रेणवाकार्यं ॥ मूलमंत्रलक्षणंगारुडे ॥ प्रणवादिनमोंतंचचतुर्थ्यंतंचसत्तमदेव-
तायाःस्वकंनाममूलमंत्रः प्रकीर्तितः ॥ ब्राह्मेपि ॥ ॐ कारादिसमायुक्तंनमस्कारांतकीर्तनं ॥ स्वनामसर्वसत्वानांमंत्रइत्यभिधीय
ते ॥ ॐ सूर्यायनमइत्यादि ॥ वाजपेययाजिनस्तुश्लिष्टमंत्रेणपंचायतनपूजनमित्याहुः ॥ युक्तंतु ॥ ऋगंतेश्लिष्टमंत्रमुच्चार्यपाद्यादि-
निवेदयेदिति ॥ पंचायतनप्रकारोज्ञानमालायां ॥ सहस्रांशुंर्यदामध्येईशान्यांपार्वतीपतिं आग्नेय्यामेकदंतंचनैर्ऋत्यामच्युतंतथा-
वायव्यांपूजयेद्देवींभोगमोक्षैकभूमिकामिति ॥ सूर्यपंचायतनं ॥ हेरंबंतुयदामध्येईशान्यामच्युतंयजेत् ॥ आग्नेय्यांपंचवक्त्रंतु नैर्ऋ-
त्यांजगदंबिकां ॥ वायव्यांद्युमणिंचैवयजेन्मंत्रीत्वनंद्रितः ॥ इतिगणपतिपंचायतनं ॥ भवानींतुयदामध्येईशान्यांमाधवंयजेत् ॥ आ
ग्नेय्यांपार्वतीनाथंनैर्ऋत्यांजगदंबिकांगणनायकं ॥ प्रद्योतनंतुवायव्यांमाचार्यस्तुप्रपूजयेत् ॥ इतिलक्ष्मीपंचायतनं ॥ शंकरंतुयदाम
ध्येईशान्यांश्रीपतिंयजेत् ॥ आग्नेय्यांच तथाहंसंनैर्ऋत्यांपार्वतीसुतंवायव्यांचसदापूज्याभवानीभक्तवत्सलेतिशिवपंचायतनं ॥ य
दातुमध्येगोविंदमैशान्यांशंकरंयजेत् ॥ आग्नेय्यांगणनाथंचनैर्ऋत्यांतपनंतथा ॥ वायव्यामंबिकांचैव यजेन्मंत्रीसमाहितइति-
विष्णुपंचायतनं ॥ स्वस्थानवर्जितादेवाः शोकदुःखभयप्रदाः तन्मंडलस्थितोराजासाधकश्चविनश्यति ॥ बोपदेवश्च ॥ शंभो

मध्यगतेहरीनहरम्भू देव्योहरेशंकरे ॥ भास्येनागस्कतारवेहेरगणेशाजांबिकास्थापिता: ॥ देव्यांविष्णुशिवैकदंतरवयोलंबोदरे जेश्वरेना
र्या: शंकरभागतोतिस्करवदाभ्यस्तास्कनेहानिदा: ॥ अस्यायमर्थ: ॥ शंभोमध्यगतेसतिशंकरभागतईशानकोणमारभ्य आग्नेय्या
दिकोणेषुहरीनहरभूदेव्य स्थाप्या: तथाचइशानेविष्णु: ॥ आग्नेय्यामिन: सूर्य: नैर्ऋत्येहरभूर्गणेश: वायव्यांदेवीति ॥ हरौमध्यगतेसति
ईशनादिकोणेषुशंकरे भास्येनागस्कत :॥ ईशान्यांशंकर : आग्नेय्यांइभास्योगणपति: नैर्ऋत्यांसूर्य : वायव्यांत्वगस्कतादेवीरवौमध्य
गतेसतिइशानादिषुहरगणे शाजांबिका: ईशान्यांहर: अग्नेय्या गणेश : नैर्ऋत्यांविष्णु: वायव्यामंबिकादेव्यांमध्यगतायांसत्यांईशा० वि
ष्णुशिवैकदंतरवय: ईशा० विष्णु: आ० शिव: नैर्ऋत्यांगणेश: वा० सूर्य: लंबोदरेमध्यगतेसतिईशानादिषु अजेश्वरनार्या: ई० विष्णु:
आ० शिव: नै० सूर्य: वा० देवीतिक्रममाह ॥ अत्रईशानादिकल्पना यत्रैवभानुस्म वियत्कदेतिप्राचीतुतांवेदविदोवदंतिइतिगौतमोक्त प्राची
मनुसंधायद्रष्टव्य: यत्तुपूज्यपूजकयोर्मध्येप्राचीप्रोक्ता विचक्षणै: प्राच्येवप्राचीसोद्दिष्टासुस्कावेदेवपूजनमिति विष्णुयामलवाक्यंतत्तांत्रि
कपूजाविषयं ॥ उक्तंच ॥ श्रीमातामहचरणैराचारमयूरवेपूज्यपूजकांत: प्राचीआगमोक्त पूजायामेवनत्परिभाषायामुक्तत्वादिति
॥ पंचायतनपूजाक्रमोपितत्रैवोक्त: ॥ मुरव्येपुष्पांजलिंदत्वागणेशाद्यर्चनंभवेत् ॥ गणेशाएवमुरव्यश्चेत्तत्रसूर्यक्रमाद्भवेदितिवचनात्प्र
धानदेवतायांपुष्पांजल्यंतंपूजाकांडंसमाप्यपदार्थानुसमयेनगणेशादीनर्चयेदिति ॥ शारदातिलकटीकायांतुपुष्पांजलिंमुरव्ये आदौदत्वा

र्चनंकार्यमित्युक्तंवस्तुतस्त्वयमपिपूजाक्रमस्तांत्रिकपूजायामेवज्ञेयः तत्रैवोक्तत्वात् ॥ वैदिकपूजायांतुस्थापनक्रमएव ॥ अतएववाज
पेययाजिभिर्विष्णुशिवगणेशसूर्यदुर्गाभ्योनमइतिश्लिष्टमंत्रउक्तोविष्णुपंचायतने ॥ सूर्यपंचायतनपूजनेतुक्रमउक्तः ॥ पद्मपुराणे ॥ आ
दित्यंगणनाथंचदेवींरुद्रंयथाक्रमं नारायणंविशुद्धाख्यमंतेचकुलदेवताः ॥ तत्रान्यत्रैव ॥ रवि र्विनायकश्चंडी ईशोविष्णुस्तुपंचमः अनुक्र
मेणपूज्यंतेव्युत्क्रमेणमहद्भयमिति ॥ सूर्यातिरिक्तपंचायतनादिपूजायामप्यादौसूर्यपूजांविधाय विष्ण्वादिदेवानांपूजाकार्या ॥ तदुक्तं
ब्राह्मे ॥ अपूज्यप्रथमंसूर्यमपरान्यःप्रपूजयेत् नतद्गृह्णंतितत्कृतंपापंसम्प्रतीच्छंतिदेवताइति ॥ इदंचपूजनंभूतशुद्धिंप्राणप्रतिष्ठांमातृकान्या
संचविधायकार्यमितिप्रयोगपारिजातादयः ॥ शौनकोऽपि ॥ कृत्वातुभूतशुद्धिंचमातृकान्यासमाचरेदिति ॥ पूजाप्रकरणेउक्तं तथाचश्रु
तिः ॥ देवोभूत्वादेवान्यजेदिति ॥ रामतापिन्यांच देवोभूत्वायजेद्देवंनादेवोदेवमर्चयेत् ॥ मंत्रमहोदधावपि ॥ देवार्चायोग्यताप्राप्त्यैभू
तशुद्धिंसमाचरेत् भूतशुद्धिंविधायैवंप्राणस्थापनमाचरेत् ॥ एवंप्राणान्प्रतिष्ठाप्यमातृकान्यासमाचरेत् ॥ एवंमूलवाक्यानुसारेणेत्य
र्थः ॥ मूलवाक्यानितुग्रंथविस्तृतिभयान्नोक्तानि ॥ तानिमत्कृतमंत्रमार्तंडेद्रष्टव्यानीतिदिक् ॥ अथपुरुषसूक्तविधानंऋग्विधाने ॥ अर्चनं
संप्रवक्ष्यामिविष्णोरमिततेजसः ॥ यत्कृत्वामुनयःसर्वेपरंनिर्वाणमाप्नुयुः ॥ अनुष्टुभस्यसूक्तस्यत्रिष्टुबंतस्यदेवता ॥ पुरुषोयोजगद्बीजं
ऋषिर्नारायणःस्मृतः ॥ प्रथमांविन्यसेद्वामेद्वितीयांदक्षिणेकरे ॥ तृतीयांवामपादेचचतुर्थींदक्षिणेन्यसेत् ॥ पंचमींवामजानौतुष-

ष्ठींवैदक्षिणेन्यसेत्॥ सप्तमींवामके स्यात्तु अष्टमींदक्षिणेतथा॥ नवमींनाभिमध्येतुदशमींहृदयेतथा॥ एकादशींकंठमध्येद्वादशींवा
मबाहुके॥ त्रयोदशींदक्षिणेतुतथैवास्येचतुर्दशीं॥ अक्ष्णोः पंचदशींचैवविन्यसेन्मूर्ध्निषोडशीं॥ एवंन्यासविधिंकृत्वापंचांगानिसमा
चरेत् ब्राह्मणोस्येत्यादिभिश्चऋग्भिः पंचांगकल्पना॥ हृदयंचशिरः शिखाकवचंचास्यमेवच॥ यथादेहेतथादेवेन्यासंकृत्वायथाविधि
एवंन्यासविधिंकृत्वापश्चात्पूजांसमारभेत्॥ न्यासेनतुभवेत्सोपिस्वयमेवजनार्दनः॥ आद्ययावाहयेद्देवमृचातुपुरुषोत्तमं द्वितीययाऽ
सनंदद्यात्पाद्यंचैवतृतीयया॥ अर्घ्यंचतुर्थ्यादातव्यंपंचम्याचमनीयकं॥ षष्ठ्यास्नानंप्रदेयंतुसप्तम्यावस्त्रमेवच॥ यज्ञोपवीतमष्टम्या
नवम्याचंदनंस्मृतं॥ पुष्पंदशम्यादातव्यमेकादश्यांतुधूपकं॥ द्वादश्यादीपकंदद्यात्त्रयोदश्यानिवेदनं॥ चतुर्दश्यानमस्कारंपंचद
श्याप्रदक्षिणाः॥ उद्वासनंतुषोडश्याउपचारास्तुषोडश॥ स्नानेवस्त्रेचनैवेद्येदद्यादाचमनीयकं॥ हुत्वाषोडशभिर्मंत्रैर्दद्यात्पुष्पाणि-
षोडश॥ तच्चसर्वंजपेद्भूयः पौरुषंसूक्तमेवच॥ षण्मासात्सिद्धिमाप्नोतित्येवमेवसमर्चनात्॥ अत्रयद्य प्यावाहनंविसर्जनंचोक्तं त-
त्प्रत्यहंप्राणप्रतिष्ठापूर्वकप्रतिमादिपूजनविषयं॥ अन्यत्र त्वादावंतेचपुष्पांजलिंसमर्पयेत्॥ आदावंतेचमंत्राभ्यांपुष्पांजलिसमर्पणमि
तिनारदीयवाक्यात्॥ वस्त्रंप्रत्यहंननवीनंकिंतुसमर्पितमेवाभ्युक्ष्यसमर्पयेत्॥ तदुक्तंतत्वसागरे॥ वस्त्रमभ्युक्षणाच्छुध्येदपरंतुदिने
दिने॥ आचारमयूखेमंत्रराजविधौ॥ प्रतिमापट्टयंत्राणांनित्यस्नानंनकारयेत्॥ कारयेत्पर्वदिवसेयथामलनिवारणमिति॥ कूर्मपु

राणे ॥ नविष्णुाराधनात्पुण्यंविद्यतेकर्मवैदिकं ॥ नस्मादनादिमध्यांतंनित्यमाराधयेध्वरिं ॥ तद्विष्णोरितिमंत्रेणसूक्तेनपौरुषेणवा नै
वाभ्यांसदृशोमंत्रो वेदेषूक्तश्चपावनः ॥ अथवादेवमीशानंभगवंतंसनातनं ॥ आराधयेन्महादेवंभावपूतोमहेश्वरं ॥ मंत्रेणरुद्रगायत्र्या-
प्रणवेनाथवापुनः ईशानेनाथवारुद्रैस्त्र्यंबकेनसमाहितः ॥ तथोंनमः शिवायेतिमंत्रेणानेनवायजेदिति ॥ यजनप्रकारंबौधायनोव्या ह
॥ अथातोहरहः परिचर्याविधिंव्याख्यास्यामः स्नात्वाशुचौदेशेगोमयेनोपलिप्यप्रतिकृतिंकृत्वाक्षतपुष्पैर्यथालाभंसमर्चयेत् सहपु-
ष्पोदकेनमहादेवमावाहयेत् ॥ ॐ भूः महादेवमावाहयामि ॥ ॐ भुवः महादेवमावाहयामि ॥ ॐ स्व : महा॰ ॥ ॐ भूर्भुवः स्वर्महादेव
मावाहयामिइत्यावाह्यायातुभगवान्महादेवइत्यथस्वागतेनाभिवंदतिस्वागतमनुनास्वागतंभगवतेमहापुरुषायेतस्त्वासनंकूर्चमास्तां-
भगवन्महादेवइत्यत्रकूर्चंददातिभगवतेयंकूर्चोदर्भमयस्त्रिवृद्धरितः सुवर्णस्तंजुषस्वेति ॥ अत्रस्थानानिकल्पयति ॥ अग्रतोब्रह्मणे
कल्पयामिदक्षिणतः स्कंदायकल्पयामिविनायकायकल्पयामिपश्चिमतः स्थूलायकल्पयामिउत्तरतः उमायैकल्पयामि नं दिके
श्वरायकल्पयामीतिकल्पयित्वासावित्र्यापात्रमभिमंत्र्यप्रक्षाल्यतिरः पवित्रमध्यआनीयसहपवित्रेणादित्यंदर्शयेत् ॥ ॐ मित्युत-
मितिस्नानं ॥ ॐ स्वरितिरुद्रेणपाद्यात्प्रणवेनार्घ्यमथव्याहृतिभिर्निर्माल्यमपोह्योत्तरतश्चंडायनमइत्यथैनंस्नापयित्वापोहिष्ठाम
यो भुवइतितिसृभिर्हिरण्यवर्णाः शुचयः पावकाः इतिचतसृभिः प वमानः सुवर्जनइत्येतेनानुवाकेनस्नापयित्वाद्भिस्तर्पयति ॥ भ

वंदेवंतर्पयामिशर्वंदेवंत० ईशानंदेवंत० पशुपतिंदेवंत० रुद्रंदेवंतर्पयामि उग्रंदेवंत० भीमंदेवंत० महांतंदेवंतर्पयामीतितर्पयित्वाथैनानिवस्त्रयज्ञोपवीतान्याचमनीयान्युदकेन व्याहृतिभिर्दत्वा व्याहृतिभिः प्रदक्षिणमुदकंपरिषिच्य ॥ नमस्तेरुद्रमन्यवइतिगंधंदद्यात्सहस्राणिसहस्रशइतिपुष्पंदद्यादीशानंत्वाभुवनानामधिश्रियमितिचाक्षतान्दद्यात्सावित्र्या धूपमुद्दीप्यस्वेनिदीपंदेवस्यत्वासवितुःप्रसवेश्विनोर्बाहुभ्यांभगवतेमहादेवायजुष्टंचरुंनिवेदयामीतिनैवेद्यमथाष्टाभिर्नामधेयैरष्टौपुष्पाणिदद्यात् भवायदेवायनमः ॥ शर्वायदेवायनमः ॥ ईशानायनमः ॥ पशुपतयेदेवाय० ॥ रुद्रायदेवाय० ॥ उग्रायदेवाय० ॥ भीमायदेवा० ॥ महतेदेवा० ॥ नमोब्रह्मणेनमः ॥ स्कंदायनमः ॥ प्रयातुभगवानीशः ॥ सर्वलोकनमस्कृतः ॥ अनेनहविषातृप्तः पुनरागमनायच ॥ पुनः संदर्शनायचेतिप्रतिमास्थानेष्वप्स्वग्नावाहनविसर्जनवर्ज्यंसमानमन्यत्स्वस्त्ययनमित्याचक्षतेभगवान्बोधायनइति ॥ अथपूजोपयुक्तानिपुष्पाणि ॥ तत्रादौसूर्यपूजायांविहितानि ॥ भविष्यपुराणे ॥ मालिनीमल्लिकाचैवदूर्वाचाशोककर्णिका ॥ पाटलाकरवीराणिजपाजयंतिरेवच ॥ चंपकोबकुलंचैवतथैवागास्ति किंशुको भास्करस्यप्रपूजार्थंग्राह्याण्येतानिनित्यशः ॥ नीलोत्पलसहस्रेणनीलोत्पलशतेनच ॥ रक्तैश्चकरवीरैश्चयस्तुपूजयतेरविं ॥ वसेदर्कपुरे श्रीमान्सूर्यतुल्यपराक्रमइति ॥ अथविहितपत्राणिबिल्वपत्रंशमीपत्रंभृंगराजस्यपत्रकं ॥ तमालपत्रंचहरेःसद्यस्तुष्टिकरंरवेः तुलसीकालतुलसीतथारक्तंचचंदनं ॥ केतकीपत्रकुसुमंसदेवतपनप्रियमिति ॥ अन्यान्यपिगणेशादिपूजायांविहितनिषिद्धानिग्रंथस्तरभि

येहनोक्तानितान्याचारमयूखादिग्रंथेभ्योवगंतव्यानि ॥ तत्रापूर्वाभावेपर्युषितान्यपिग्राह्याणीत्युक्तंस्मृत्यंतरे ॥ पंकजंपंचरात्रंस्यादृशरा
त्रंचबिल्वकं ॥ तुलस्यैकादशाहात्तुपुनःप्रक्षाल्यपूजयेत् ॥ स्कांदे ॥ गंगाजलंत्र्यहाद्ग्राह्यंपूजनेभक्तिसंयुतः ॥ भविष्ये ॥ नाक्षतैरर्चये
द्विष्णुंनतुलस्यागणेश्वरं ॥ दूर्वाभिर्नार्चयेद्दुर्गांकेतकैर्नमहेश्वरं ॥ अक्षतानिषेधस्तुशालग्रामपरः शालग्रामशिलामेवनाक्षतैरर्चयेद्दि-
जइतिविष्णूक्तेः ॥ उक्तंचवार्तिके ॥ सामान्यविधिरस्पष्टः संह्रियेतविशेषतइति ॥ नांगुष्ठैर्मर्दयेद्देवंनाधःपुष्पैःसमर्चयेत् ॥ कुशाग्रेर्न
क्षिपेत्तोयंवज्रपातसमंभवेत् ॥ नशुष्कैःपूजयेद्देवंकुसुमैर्नमहीगतैः ॥ नविशीर्णदलैःशिष्टैर्नाशुभैर्नाविकाशितैः ॥ पूतिगंधोग्रगं
धीनि अल्पगंधीनिवर्जयेत् ॥ वामने ॥ हिरुकाकंकणंदारुमल्लिकागुरुवासिता ॥ शांखंजातीफलंश्रीमच्छियाधूपाहरेरिमे ॥ हिरु-
कामांसी ॥ कंकणंगुग्गुलःशंखोनखं ॥ घृततैलैर्विनाकिंचिद्दीपार्थंनसमाहरेत् ॥ पाद्मे ॥ नैवेद्यपात्रंवक्ष्यामिकेशवायमहात्मने ॥ हैरण्यं
राजतंकांस्यंताम्रंमृन्मयमेवच ॥ पालाशंपद्मपत्रंवापात्रंविष्णोरतिप्रियं ॥ हविःशाल्योदनंदिव्यमाज्ययुक्तंसशर्करं ॥ नैवेद्यंदेवदेवा
ययावकंपायसंतथा ॥ नैवेद्यवस्त्वलाभेतुफलानिविनिवेदयेत् ॥ फलानामप्यलाभेतुतोयान्यपिनिवेदयेत् ॥ मरीचिः ॥ विधायदेवतापूजांप्रात
र्होमादनंतरं ॥ गुरूक्तेनतुमार्गेणमूलमंत्रंजपेद्बुधइति ॥ भविष्ये ॥ समभ्यर्च्यपिबेद्देवान्यःपादसलिलंहरेः सयातिपरमंस्थानंतद्विष्णोःप
रमंपदं ॥ विष्णुपादाभिषिक्तंयःपात्रेणैवपिबेज्जलं ॥ सर्वपापविनिर्मुक्तः सयातिपरमांगतिं ॥ यःपादसलिलंविष्णोः करेणपिबतेप-

दि ॥ सम्भूतेनरकंयातियावदिंद्राश्चतुर्दशेति ॥ पुलस्त्यः ॥ शालग्रामशिलावारिसोमपानंदिनेदिने ॥ पात्रांतरेणतद्ग्राह्यंकरेणास्पृश्यतास्म
मिति ॥ मौङ्करेणपानविधायकानि ॥ प्रायः पांचरात्रादिपठितत्वेनतदनुयायिपराणि ॥ नतुवैदिकपराणि ॥ स्मृतिषुनिषेधात् ॥ अ
गस्त्यः ॥ शालग्रामशिलातोयमपीत्वायस्तुमस्तके ॥ प्रक्षेपणंप्रकुर्वीतब्रह्महासनिगद्यते ॥ यद्वासर्वदुरितक्षयकामः ॥ स्मृत्यंतरोक्तं विप्रपा
दसलिलपानमिच्छंतितदाक्रमः ॥ पाद्मे ॥ विष्णुपादोदकात्पूर्वंविप्रपादोदकंपिबेत् ॥ विरुद्धमाचरेद्यस्तुब्रह्महासनिगद्यतइति ॥ अथ
शिवलिंगनैवेद्यभक्ष्याभक्ष्यविचारः ॥ पद्मपुराणे ॥ द्रव्यमन्नंफलंतोयंशिवस्वंनस्पृशेत्क्वचित् ॥ लंघयेन्नैवनिर्माल्यं कूपेसर्वंविनिक्षिपेत्
॥ मक्षिकापादमात्रंयः शिवस्वमुपजीवति ॥ लोभान्मोहात्सपच्येतकल्पांतेनरकेनरइति ॥ पाद्मस्कांदब्राह्मपुराणेसंग्रहेषु ॥ शिवउवाच
॥ अनर्हंममनैवेद्यंपत्रंपुष्पंफलंजलं ॥ शालग्रामशिलालग्नंसर्वंयातिपवित्रतां ॥ नैवेद्यंमेनरोभुक्त्वाशुद्ध्येचांद्रायणंचरेदिति निर्माल्यक
ल्पनाचोक्तासिद्धांतशेखरे ॥ धराहिरण्यगोरत्नताम्ररौप्यांशुकादिकान् ॥ विहायशेषंनिर्माल्यंचंडेशायनिवेदयेत् ॥ अन्यदन्नादिपानीयं
तांबूलंगंधपुष्पकं ॥ दद्याच्चंडायनिर्माल्यंशिवभक्तंतुसर्वशः इतिक्वचिच्छिवलिंगनैवेद्यभक्षणेदोषाभावउक्तः ॥ शिवनारदसंवादे ॥ बाणलिंगेतुचं
डांशोनैवनिर्माल्यकल्पना ॥ सर्वंबाणार्पितंग्राह्यंभक्ष्याभक्ष्यंचनान्यथा ॥ ग्राह्याग्राह्यविचारोयंबाणलिंगेनविद्यते ॥ तदर्पितंजलंचान्नंग्राह्यंप्रसा
दसंज्ञया ॥ बाणलिंगेस्वयंभूतेचंद्रकांतेहृदिस्थिते ॥ चांद्रायणसमंज्ञेयंशंभोर्नैवेद्यभक्षणमिति ॥ अथपूजाप्रयोगः ॥ आचम्यदेशकालौस्मृत्वाममउ॰

यथाशक्तियथाज्ञानंयथामीलितोपचारैः श्रीसूर्यादिपूजांकरिष्ये ॥ तदंगत्वेनात्मशुध्यर्थंभूतशुध्यादिकरिष्येइतिसंकल्प्य ॥ पृथ्वीत्वस्य
मेरुपृष्ठःकूर्मःसुतलं आसनेवि॰ ॥ पृथ्वीत्वया॰ ॥ अपसर्पंतुवामदेवोभूतान्यनुष्टुप् ॥ भूतोत्सादनेविनियोगः ॥ ॐ अपस॰ मारभइति
पादतलपार्श्वेनभूमिंत्रिःप्रहृत्य ॥ देवाआयांतुयातुधानाअपयांतु ॥ विष्णोदेवयजनंरक्षस्व ॥ येभ्योमाताइत्यस्यगयःप्लातोविश्वेदे
वाजगती ॥ मनुष्यगंधनिवारणेवि॰ ॥ एवापित्रइत्यस्यवामदेवोबृहस्पतिर्विश्वेदेवास्त्रिष्टुप् ॥ मनुष्यगंधनिवारणेवि॰ ॥ ॐ येभ्योमाता
मधुमत्पिन्वतेपयः पीयूषंद्यौरदितिरद्रिबर्हाः ॥ उक्थशुष्मान्वृषभरान्त्स्वप्नसस्तां आदित्यां अनुमदास्वस्तये ॥ ॐ एवापित्रेविश्वदे
वायवृष्णेयज्ञैर्विधेमनमसाहविर्भिः ॥ बृहस्पतेसुप्रजावीरवंतोवयंस्यामपतयोरयीणां ॥ आगमार्थंतुदेवानांगमनार्थंतुरक्षसां ॥
कुरुघंटेवरंनादंदेवानांस्थानसंनिधौ ॥ इतिघंटांवादयित्वा भूतशुद्धिंकुर्यात् ॥ मूलाधारेकुंडलिनींध्यात्वाहुमित्युत्थाप्यसुषुम्नामार्गेण
हृदयस्थंजीवंब्रह्मणिहंसइतिविलाप्य ॥ पादादिजान्वंतंपृथिवींलं बीजयुतांध्यात्वा ॥ जान्वादिनाभ्यंतंवंबीजयुतं जलंध्यात्वा ॥ नाभ्यादि
हृदयांतंरंबीजयुतमग्निंध्यात्वा हृदादिभ्रूमध्यांतंयंबीजयुतंवायुंध्यात्वाभ्रूमध्यादिब्रह्मरंध्रांतंहंबीजमाकाशंध्यात्वाभूतानिप्रत्येकंसं-
विलापयेत् ॥ पृथिवीमप्सुसंहरामि ॥ जलमग्नौसंहरामि ॥ अग्निंवायौसं॰ ॥ वायुमाकाशेसं॰ ॥ आकाशमहंकारेसं॰ ॥ अहंकारंमहत्तत्वेसं
हरामि ॥ महांतंप्रकृतौसं॰ ॥ प्रकृतिंशुद्धब्रह्मणिसंहरामि ॥ आत्मानंब्रह्माहमस्मीतिध्यात्वादक्षिणकुक्षावधोमुखंपापपुरुषंध्यात्वा-

यमितिबीजेनद्वात्रिंशद्वारमावर्तितेनवामनासयावायुमापूर्यरमितिबीजेनचतुःषष्टिवारमावर्तितेनकुंभकेनकृत्वापापपुरुषदेहंनिर्दहेत् ॥
पुनर्यमितिबीजेनषोडशवारमावर्तितेनपापभस्मदक्षिणनासपारेचयेत् ॥ ततोवमित्यमृतबीजेनदेहोत्थंभस्मसंप्लाव्यलमितिबीजेनैकीकृ-
त्यसुवर्णभावयित्वाहमितिबीजेनसर्वांगान्युद्धृत्यकनकमयं शरीरंध्यात्वापुनरात्मनःसकाशादाकाशः संभूतः आकाशाद्वायुः वायोरग्निः
अग्नेरापः अद्भ्यः पृथिवीतिभूतान्युत्पाद्य स्वस्थानेगानिध्यात्वासोहमितिमंत्रेणकुंडलिनी सहितंजीवं हृद्यानीयसूक्ष्ममयंजीवंहृ
दिनिधायकुंडलिनींमूलाधारेगतांध्यायेदितिभूतशुद्धिः ॥ अथप्राणप्रतिष्ठा ॥ अस्यश्रीप्राणप्रतिष्ठामंत्रस्य ब्रह्मविष्णुरुद्राऋषयः
ऋग्यजुःसामानिछंदांसि प्राणशक्तिर्देवता आंबीजं ह्रींशक्तिः प्राणस्थापनेविनियोगः ॥ ब्रह्मविष्णुरुद्रेभ्योनमः ॥ शिरसि ॥ ऋ-
ग्यजुःसामभ्योनमः मुखे ॥ प्राणशक्त्यैनमः हृदये ॥ आंनमः गुह्ये ॥ क्रोंह्रींनमः पादयोरितिऋष्यादिः ॥ आदौकरन्यासः ङंकं
खंघंगं आकाशवायुवन्हिजलपृथिव्यात्मनेहृदयायनमः ॥ ञंचंछंझंजंशब्दस्पर्शरूपरसगंधात्मनेशिरसेस्वाहा ॥ णंटंठंढंडं
श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणात्मनेशिखायैवषट् ॥ नंतंथंधंदं वाक्पाणिपादपायूपस्थात्मनेकवचायहुं ॥ मंपंफंभंबं वक्तव्यादानगमनवि
सर्गानंदात्मनेनेत्रत्रयायवौषट् ॥ शंयंरंवंलंक्षंषंसं ळंहंमनोबुद्ध्यहंकारचित्तात्मने अस्त्रायफडितिछोटिकात्रयंकृत्वाध्यायेत् ॥ र-
क्ताम्बोधिस्थपोतोल्लसदरुणसरोजाधिरूढाकराब्जैः पाशं कोदंडमिक्षूद्भवगुणमथमप्यंकुशंपंचबाणान् बिभ्राणासृक्कपालंत्रिन

यनलसिनापीनवक्षोरुहाढ्यादेवीबालार्कवर्णाभवतुसुखकरीप्राणशक्तिः परानर्दानध्यात्वा ॥ मनसा संपूज्यत्हृदयेकरंनिधाय ॥ आंन्हीं
क्रों यंरंलंवंशंषंसंहों ओंक्षंसंहंसः ॥ न्हीं ओंहंसः ममप्राणाइहप्राणाः ॥ आंन्हींक्रोंमित्याद्युच्चार्यममजीवइहस्थितः ॥ आंन्हीं० ॥ ममसर्वेंद्रि
याणि ॥ आंन्हीं० ॥ ममवाङ्मनश्चक्षुः श्रोत्रघ्राणजिह्वाप्राणाइहागत्यसुखंचिरंतिष्ठंतुस्वाहा० ॥ ॐ क्षंसंहंसः न्हीं ॐ अष्टत्रिंशाधि
कशताक्षरमनुंप्राणप्रतिष्ठामंत्रंत्रिवारंजपित्वाषोडशप्रणवाञ्जपित्वाकेचित्तुप्रणवाद्योयमोमामित्यादिवदंतितन्नमूलंचिंत्यं ॥ अथ-
मातृकान्यासः ॥ तत्रादौप्राणायामः अंआंइंईंउंऊंऋंॠंऌंॡंएंऐं ओंऔंअंअः ॥ इतिषोडश स्वरान्सबिंदूनुच्चारयन्वामनासया
वायुमापूर्यकादिमांतैर्बिंदुयुतैः कुंभकंकृत्वायादिक्षांतैः सबिंदुकैर्दक्षिणनासयारेचयेत् ततोस्य अंतर्मातृकामंत्रस्यब्रह्माऋषिः
सरस्वतीदेवता गायत्रीछंदः हलोबीजानि स्वराः शक्तयः शरीरशुध्यर्थेन्यासेवि० ब्रह्मणेनमः शिरसि गायत्र्यै नमः मुखे ॥ सरस्व
त्यैनमोहृदये हल्भ्योनमोगुह्ये स्वरेभ्योनमः पादयोः अंकंखंगंघंङं आं अंगुष्ठाभ्यांनमः इंचंछंजंझंञंईं तर्जनीभ्यां० उंटंठंडंढंणं
ऊं मध्यमाभ्यां० एंतंथंदंधंनंऐं अनामिकाभ्यांनमः ॐ पंफंबंभंमं औं कनिष्ठिकाभ्यां० अंयंरंलंवंशंषंसंहंळंक्षंअः करतलकरपृ
ष्ठाभ्यां० अंकंखंगंघंङं आंहृदयायनमः इंचंछंजंझंञंईं शिरसेस्वाहा उंटंठंडंढंणंऊं शिखायैवषट् एंतंथंदंधंनंऐंकवचायहुं ॐ पंफं-
बंभंमंऔंनेत्रत्रयायवौषट् अंयंरंलंवंशंषंसंहंळंक्षंअः अस्त्रायफट् ॥ ध्यानं ॥ अत्र अंतर्मातृकावश्यकंकार्यं अक्षस्रक्कुंटकसारंग

विद्याहस्तांत्रिलोचनां चंद्रमौलिंकुचानम्रांरक्ताङ्गस्थां गिरंभजे इतिध्यात्वामनसासंपूज्य मातृकामंत्रंत्रिर्जपित्वा देवंस्नानशिलायां निधायतदग्रेचंदनेनषट्कोण मंडलत्रयमुदक्संस्थ मालिख्याभ्यर्च्यशंखंप्रणवेनाद्भिः पूरयित्वादक्षिणमंडलेसंस्थाप्याभ्यर्च्यप्रार्थयेत् त्वं पुरासागरोत्पन्नोविष्णुनाविधृतः करे निर्मितः सर्वदेवानांपांचजन्यनमोस्तुते पृथिव्यांयानितीर्थानिस्थावराणिचराणिच तानितीर्थानिशंखेस्मिन्विशंतुब्रह्मशासनादित्युक्त्वाशंखमुद्रांप्रदर्श्य मध्यमंडलेमहार्घ्यंगायत्र्याद्भिः पूरयित्वापूजयेत् उत्तरमंडलेताम्रकलशं-स्थाप्यसंपूज्यकलशस्येतिमंत्रेस्तीर्थान्यावाह्यशंखोदकेनात्मसहितपूजासंभारंप्रोक्ष्य पुरुषसूक्तेनन्यासंकुर्यात् ॥ सहस्रशीर्षेतिनारायणः पुरुषोनुष्टुप् अंत्यात्रिष्टुप् स्वांगन्यासेविनियोगः ॐ सहस्रशी० गुल० १ वामकरायनमः ॐ पुरुषएवेदं० हृति २ दक्षिणकरे ॐ एतावानस्यमहि० दिवि ३ वामपादे ॐ त्रिपादूर्ध्व० अभि ४ दक्षिणपादे ॐ तस्माद्विराळ० पुरः ५ वामजानौ ॐ यत्पुरुषेणहविषा० ऋविः ६ दक्षिणजानौ ॐ तंयज्ञंब० श्रये ७ वामकट्यां ॐ तस्माद्यज्ञात्स० श्रये ८ दक्षिणकट्यां ॐ तस्माद्यज्ञात्सर्वहुतऋचः० यत ९ नाभौ ॐ तस्मादश्वाअ० वयः १० हृदये ॐ यत्पुरुषंव्य० च्येते ११ कंठे ॐ ब्राह्मणोस्य० यत १२ वामभुजे ॐ चंद्रमामनसो० यत १३ दक्षिणभुजे-ॐ नाभ्याआसी० यन् १४ मुखे ॐ सप्तास्या० पशः १५ चक्षोर्मध्ये ॐ यज्ञेनय० देवाः १६ मूर्ध्नि ॥ अथपंचांगन्यासः ॐ ब्राह्मणोस्येति हृदये ॐ चंद्रमामनसोइतिशिरसि ॐ नाभ्याआसीदितिशिखायां ॐ सप्तास्यासन्निति कवचायहुं ॐ यज्ञेनयज्ञेति० अस्त्रायफट्

एवमेवदेवांगन्यासंकृत्वा षोडशोपचारैः पूजयेत् ॐ सहस्रशी० श्रीसूर्यगणेशमहालक्ष्मिशिवविष्णुभ्योनमः पुष्पंसमर्पयामि ॐ पुरु
षए० आसनंस० ॐ एतावानस्य० पाद्यंस० पाद्योत्तरंनाममंत्रेणैवाचमनीयं ॐ त्रिपादूर्ध्व० अर्घ्यंस० ॐ तस्माद्विराळ० आचमनी
यं ॐ यत्पुरुषेणस्नानंस० सतिसंभवेपंचामृतस्नानान्यत्रैवकारयित्वासूक्तेनाभिषेकः कार्यइतिसंप्रदायः आचमनीयं ॐ तंयज्ञं० वस्त्रं
ॐ तस्माद्यज्ञा० यज्ञोपवीतं आचमनीयं ॐ तस्माद्यज्ञा० गंधं ॐ तस्मादश्वा० पुष्पं ॐ यत्पुरुषं० धूपं ॐ ब्राह्मणोस्य० दीपं ॐ चंद्रमा०
नैवेद्यं आ० करोद्वर्तनादि ॐ नाभ्याआसी० नमस्कारं ॐ सप्तास्यासन्० प्रदक्षिणां ॐ यज्ञेन० पुष्पांजलिं ततः श्लिष्टमंत्रेणनीराज
नंकृत्वा अग्निमावाह्य पुरुषसूक्तेनप्रत्यृचमाज्यंहुत्वा पुनस्तेनैवसूक्तेनषोडशपुष्पाण्यर्पयित्वा सूक्तंजपेत् तदनंतरंस्वोपदिष्टंमूलमंत्रं
यथाशक्तिजपित्वा कर्मेश्वरार्पणंकृत्वा घंटांसंपूज्य देवंप्रार्थयेत् तत्रमंत्राः मंत्रहीनंक्रियाहीनंभक्तिहीनंसुरेश्वर यत्पूजितंमयादेव
परिपूर्णंतदस्तुमे ॥१॥ आवाहनंनजानामि नजानामितवार्चनं पूजांचैवनजानामि क्षम्यतांपरमेश्वर ॥२॥ अन्यथाशरणंनास्तित्वमे
वशरणंमम तस्मात्कारुण्यभावेनरक्षस्वपरमेश्वर ॥३॥ भूमौस्खलितपादानां भूमिरेवावलंबनं त्वयिजातापराधानांत्वमेवशरणं
मम ॥४॥ इतिप्रार्थ्य शंखमध्येस्थितंतोयंभ्रामितंकेशवोपरि अंगलग्नंमनुष्याणां ब्रह्महत्यांव्यपोहतु ॥१॥ इतिदेवोपरिभ्राम
यित्वाजलंशिरसिधार्यम्भक्तस्य अकालमृत्युहरणंब्रह्महत्याविनाशनं रोगघ्नंपुण्यदंपास्येसुरपादावनेजनमितिमंत्रेणदेवतीर्थंपि

बेज्जलमितिसंक्षेपः इतिश्रीभारद्वाजमहादेवभट्टात्मजदिवाकरकृते आचारार्के अष्टधाविभक्तस्यदिवसस्यप्रथमभागकृत्यं॥सनातनंनि
न्मयमादिबीजंसंसारवृक्षस्यगिरामगम्यं रामाभिधंज्योतिरहर्निशंतद्धृद्ब्जकोशेस्फुरतान्मदीये ॥१॥ अथद्वितीयभागकृत्यं मदनर
त्नेदक्षः दिवसस्याद्यभागेतुसर्वमेतत्समाचरेत् द्वितीयेचतथाभागेवेदाभ्यासोविधीयते ॥१॥ वेदाभ्यासोपिपंचधेत्युक्तमाचारमयूरवे
षड्विंशन्मते वेदस्वीकरणंपूर्वंविचारोभ्यसनंजपः तद्दानं चैवशिष्येभ्योवेदाभ्यासोहिपंचधेति ॥ कौर्मे ॥ जपेदध्यापयेच्छिष्यान्धारये
द्वाविचारयेत् अवेक्षेतचशास्त्राणिधर्मादीनिद्विजोत्तमइति द्वितीयभागकृत्यं ॥अथतृतीयभागकृत्यमाह दक्षः तृतीयेचतथाभागे
पोष्यवर्गार्थसाधनं पोष्यवर्गमप्याह मातापितागुरुर्भार्याप्रजाहीनःसमाश्रितः अभ्यागतोतिथिःश्चाग्निः पोष्यवर्गउदाहृतः ज्ञाति
र्बंधुजनःक्षीणस्तथानाथःसमाश्रितः ॥इतितृतीयभागकृत्यं ॥ अथचतुर्थभागकृत्यं दक्षस्मृतौ चतुर्थेतुदिवाभागेस्नानार्थंमृदमाह
रेत् तिलपुष्पकुशादींश्चस्नायाच्चाकृत्रिमेजले गृह्यपरिशिष्टे अथमध्यंदिनेतीर्थमेत्यस्नायान्नास्मिन्ब्रह्मयज्ञतर्पणाद्वस्त्रंनिष्पीडयेदि
ति तच्च प्रतिपत्षष्ठ्येकादशीरविभौमभृगुवारभरणीकृत्तिकामघानक्षत्रमन्वादियुगादिभिन्नतिथौकार्यं तत्रतन्निषेधात् निषेधवा
क्यानितुमदनरत्नादिग्रंथेषुद्रष्टव्यानि॥ अथमध्यान्हस्नानप्रयोगः नदीतीरमेत्यप्रक्षालितमुखपादपाणिराचांतोबद्धशिखः कृत्वोदे
शेधकृत्यमृत्तिकांतंदुलयवतिलांश्चनिधायमलस्नानंविधायदेशकालौस्मृत्वा ममसमस्तपापक्षयायुरभिवृद्धिद्वाराश्रीपरमेश्वरप्रीत्य

र्थंमध्यान्हस्नानंकरिष्ये इतिसंकल्प्य मृत्तिकांगायत्र्यादाय अश्वक्रांतेरथक्रांतेविष्णुक्रांतेवसुंधरे शिरसाधारयिष्यामिरक्षस्वमांप
देपदे उद्धृतासिवराहेणकृष्णेनशतबाहुना मृत्तिकेहनमेपापं यन्मयादुष्कृतंकृतमित्यभिमंत्र्यगायत्र्याप्रोक्ष्य गायत्रीशिरः संज्ञकेन ॐ
आपोज्योतिरसोमृतंब्रह्मभूर्भुवः स्वरोमितिमंत्रेणावृत्यात्रेधाविभज्यैकेनभागेनमूर्धादिनाभिपर्यंतंद्वितीयभागेननाभेरधः पादप
र्यंतमनुलिप्यांगानिप्रक्षालयित्वादित्यंनिरीक्ष्यद्विराचम्यतृतीयभागंप्रचोद्यादित्यस्त्रेणादायसव्येपाणौकृत्वा ॐ भूरितिदक्षिणभा
गं ॐ भुवइतिमध्यमभागं ॐ स्वरित्युत्तरभागंविधायदक्षिणभागमस्त्रेणदशदिक्षुमंत्रावृत्यानिक्षिप्योत्तरभागंतीर्थेतूष्णींप्रक्षि
प्यामध्यमभागंगायत्र्याभिमंत्र्य आदित्यायप्रदर्श्यगायत्र्याप्रणवेनचसर्वांगमनुलिप्य स्नात्वानआपओषधयः संतुदुर्मित्र्याइतिमंत्रे
णाद्विरात्मानंपरिषिच्यदुर्मित्र्यास्तस्मैसंतुयोस्मान्द्वेष्टियंचवयंद्विष्मइतिमंत्रेणांगानिप्रक्षाल्याचम्यप्रातस्नानवद्वरुणावाहनादिवस्त्रनि
ष्पीडनवर्ज्यंकुर्यात् अशक्तोप्रातर्वत्स्नायात् अथात्रैवाशक्तस्यमंत्रस्नानविधि र्लिख्यते अथहेमाद्रौयोगयाज्ञवल्क्यः असामर्थ्याच्छ
रीरस्यकालशक्त्याद्यपेक्षयामंत्रस्नानादितः सप्तकेचिदेच्छंतिसूरयः मांत्रंभौमंतथाग्नेयंवायव्यंदिव्यमेवच वारुणंमानसंचैवसप्तस्नाना-
न्यनुक्रमात् एतेषांलक्षणान्याह सएव आपोहिष्ठादिभिर्मांत्रंमृदालंभश्चपार्थिवं आग्नेयंभस्मनास्नानंवायव्यंगोरजःस्मृतं यत्तुसा
तपवर्षेणस्नानंतद्दिव्यमुच्यते वारुणंचावगाहस्तुमानसंविष्णुचिंतनमिति ॥ जाबालिः ॥अ शिरस्कंभवेत्स्नानंस्नानाशक्तौतुकर्मिणां-

आर्द्रेणवाससावापिमार्जनंदैहिकंविदुः ज्वराभिभूतायानारीरजसाचपरिप्लुता कथंतस्याभवेच्छौचं शुद्धिःस्यात्केनकर्मणा चतु-
र्थेहनिसंप्राप्तेस्पृशेदन्यातुतांस्त्रियं सास्नात्वावगाह्यापः स्नात्वास्नात्वापुनःस्पृशेत् दशद्वादशकृत्वोवा आचामेच्चपुनःपुनः अंतेचवास
सात्यागस्ततःशुद्धाभवेत्तुसेति परिशिष्टे अथाशक्तस्यमंत्रस्नानं शुचौदेशेशुचिः राचांतः प्राणानायम्यदर्भपाणिः सव्येपाणावपः कृ-
त्वातिसृभिरापोहिष्ठीयाभिः पच्छः प्रणवपूर्वंदर्भोदकैर्मार्जयेत्पादयोर्मूर्ध्निहृदयेमूर्ध्निहृदयेपादयोर्हृदयेपादयोर्मूर्ध्निचाथार्धर्चशोमूर्ध्निहृ
दयेपादयोर्हृदयेपादयोर्मूर्ध्निचाथर्चोहृदयेपादयोर्मूर्ध्नि चाथतृचेनमूर्ध्निइतिमार्जयित्वागायत्र्यादशधाभिमंत्रिता अपःप्रणवेनपीत्वा-
हिराचमेदित्येतन्मंत्रस्नानं एवंमध्यान्हस्नानंविधायमध्यान्हसंध्याकार्यानतोब्रह्मयज्ञः तथाचपरशुरामनिबंधेत्रिःस्नानंमाध्यान्हिकं
कृत्वासंध्याकर्मनिवर्त्यच ब्रह्मयज्ञंविधायाथगृहमेत्याचरेत्परानिति शंखः प्रातःसंध्यांसनक्षत्रांमध्यमांस्नानकर्मणि सादित्यांपश्चि
मांसंध्यामुपासीतयथाविधीति स्नानकर्मणिकृतेसतीतिशेषः अत्रकेचिद्बह्वृचानामादौब्रह्मयज्ञः ततःसंध्यातत्सूत्रेग्रामान्निष्क्रम्या
पआप्लुत्यशुचौदेशेयज्ञोपवीत्या दिनाब्रह्मयज्ञस्यस्नानानंतर्योक्तेरित्याहुस्तच्चिंत्यं अपआप्लुत्येतिक्त्वाप्रत्ययस्योत्तरकालमात्रार्थत्वे
ऽप्यव्यवहितोत्तरकालार्थत्वाभावेनात्रिवचनोक्तक्रमबाधेप्रमाणाभावात् तथाचसंध्याहीनोऽशुचिर्नित्यमनर्हःसर्वकर्मसु यदन्यत्कुरुते
कर्मनतस्यफलभाग्भवेदिति दक्षवाक्याच्च संध्यैवादौयुक्ता एषएव श्रीमातामहचरणानांवाजपेययाजिनांप्रयोगपारिजातका

रादिपूर्वनिबंधकाराणां स्नानोत्तरं संध्याप्रयोगं वदतामाशयः मध्यान्हसंध्यायाः कालांतरमप्याह शातातपः अध्यर्धयामादासायं-
संध्यामाध्यान्हिकी स्मृतेति अथमध्यान्हसंध्यायां विशेषः भगवान् आपः पुनंतुमध्यान्हेमंत्राचमनमाचरेत् गृह्यपरिशिष्टे आ
कृष्णीययाहंसवत्सावात्रिः सकृद्वार्घ्यमुत्क्षिपेदिति अर्घ्यदानेविशेषः संग्रहे मुक्तहस्तेनदातव्यंमुद्रांतत्रनकारयेत् तर्जन्यंगुष्ठयो
गेन राक्षसीमुद्रिकामना राक्षसीमुद्रिकार्घ्येण तत्तोयंरुधिरंभवेत् जलेत्वर्घ्यप्रदातव्यंजलाभावेशुचिस्थले संप्रोक्ष्यवारिणासम्यक्त
तोर्घ्यंतुप्रदापयेदिति उपस्थानेविशेषोगृह्यपरिशिष्टे उद्वाहुरुदुत्यंजातवेदसंचित्रंदेवानामिति सूक्ताभ्यामादित्यमुपस्थायजप-
मासीनोयथेष्टकालंकुर्यादित्येष संध्याविधिर्व्याख्यातइति गायत्रीजपस्तूपविश्यैवकार्यः परिशिष्टात् तथामध्यमसंध्यायामासीनः
प्राङ्मुखोजपेदितिस्मृतिचंद्रिकायां पुराणोक्तेश्च संध्यालोपेप्रायश्चित्तंस्मृत्यंतरे यःसंध्यांयदिनोपास्तिअग्निकार्यंनचेत्कृतं गा
यत्र्यष्टशतंजप्यं प्रायश्चित्तंद्विजन्मनामिति अथप्रयोगः आचम्यप्राणानायम्यममोपात्तदुरितक्षयद्वाराश्रीपरमेश्वरप्रीत्यर्थंम
ध्यान्हसंध्यामुपासिष्येइतिसंकल्प्यापोहिष्ठेतिवृचेनपूर्ववत्प्रथममार्जनंकृत्वा मंत्राचमनंकार्यं आपः पुनंत्वित्यस्यानुवाकस्यना
रायणआपोअष्टिः मंत्राचमनेविनियोगः ॐआपःपुनंतुपृथिवींपृथिवीपूतापुनातुमां पुनंतुब्रह्मणस्पतिर्ब्रह्मपूतापुनातुमां यदु
च्छिष्टमभोज्यंयद्वादुश्चरितंमम सर्वंपुनंतुमामापोसतांचप्रतिग्रहं स्वाहा इतिमंत्रेणापःपीत्वाचम्य प्रातःसंध्यावत्द्वितीयतृतीय

चतुर्थमार्जनाघमर्षणांतंकृत्वाचम्यार्घ्यंदद्यात् हंसःशुचिषदितिमंत्रस्य गोतमोवामदेवः सूर्योजगती अर्घ्यदानेवि० ॐ हंसः शुचिष
द्वसुरंतरिक्षसद्धोतावेदिषदतिथिर्दुरोणसत् नृषद्वरसदृतसद्व्योमसदब्जागोजाऋतजा अद्रिजाऋतंश्रीसूर्यायेदमर्घ्यंदत्तंनमम एवं
त्रिः सकृद्वार्घ्यंदत्वात्मानंपरिषिच्य द्विराचम्योर्ध्वबाहुरुन्मुखः सूर्यमुपतिष्ठेत् उदुत्यमितित्रयोदशर्चस्यसूक्तस्य काण्वः प्रस्कण्वऋषिः-
श्रीसूर्योदेवता नवाद्यागायत्र्यः अंत्याश्चतस्रोनुष्टुभः चित्रंदेवानामितिषडृचस्यसूक्तस्य आंगिरसः कुत्स सूर्यः त्रिष्टुप् सूर्योप-
स्थानेवि० ॐ उदुत्यंजातवेदसंदेवंवहंतिकेतवः दृशेविश्वायसूर्यं अपत्येतायवोयथानक्षत्रायंत्यक्तुभिः सूरायविश्वचक्षसे अदृश्रम
स्यकेतवोविरश्मयोजनां२अनु भ्राजंतोअग्नयोयथा तरणिर्विश्वदर्शतोज्योतिष्कृदसिसूर्य विश्वमाभासिरोचनं प्रत्यङ्देवानांवि-
शः प्रत्यङ्ङुदेषिमानुषान् प्रत्यङ्विश्वंस्वर्दृशे ॥१॥ येनापावकचक्षसाभुरण्यंतंजनां२अनु त्वंवरुणपश्यसि विद्यामेषिरजस्पृथ्वहामि-
मानोअक्तुभिः पश्यंजन्मानिसूर्य सप्तत्वाहरितोरथेवहंतिदेवसूर्य शोचिष्केशंविचक्षण अयुक्तसप्तशुंध्युवः सूरोरथस्यनप्त्यः ता-
भिर्यातिस्वयुक्तिभिः उद्वयंतमसस्परिज्योतिष्पश्यंतउत्तरं देवंदेवत्रासूर्यमगन्मज्योतिरुत्तमं उद्यन्नद्यमित्रमहआरोहन्नुत्तरांदिवं हृद्रो-
गंममसूर्यहरिमाणंचनाशय शुकेषुमेहरिमाणंरोपणाकासुदध्मसि अथोहारिद्रवेषुमेहरिमाणंनिदध्मसि उदगादयमादित्योविश्वेन
सहसासह द्विषंतंमह्यंरंधयन्मो अहंद्विषतेरधं॥२॥ॐ चित्रंदेवानामुदगादनीकंचक्षुर्मित्रस्यवरुणस्याग्नेः आप्राद्यावा पृथिवीअंत

रिक्षंसूर्यआत्माजगतस्तस्थुषश्च सूर्योदेवीमुषसंरोचमानांमर्योनयोषामभ्येतिपश्चात् यत्रानरोदेवयंतोयुगानिवितन्वतेप्रतिभद्रायभद्रं भद्रा
अश्वाहरितःसूर्यस्यचित्राएतग्वाअनुमाद्यासः नमस्यंतोदिवआपृष्ठमस्थुः परिद्यावापृथिवीयंतिसद्यः तत्सूर्यस्यदेवत्वंतन्महित्वंमध्या
कर्तोर्विततंसंजभार यदेदयुक्तहरितः सधस्थादाद्रात्रीवासस्तनुतेसिमस्मै तन्मित्रस्यवरुणस्याभिचक्षेसूर्योरूपंकृणुतेद्योरुपस्थे अ
नंतमन्यद्रुशदस्यपाजः कृष्णमन्यद्धरितः संभरंति अद्यादेवाउदितासूर्यस्यनिरंहसः पिपृतानिरवद्यात् तन्नोमित्रोवरुणोमामहंतामदि
तिः सिंधुः पृथिवीउतद्योः ॥३॥ इत्युपस्थायोपविश्याचम्यप्राणानायम्यभूतशुद्ध्यादिकृत्वा युवतींयुवादित्यमंडलमध्यस्थां श्वेतव
र्णां श्वेतांबरानुलेपनस्रगाभरणांचतुर्वक्त्रांप्रतिवक्त्रंत्रिनेत्रांचंद्रशेखरां त्रिशूलखड्गखट्वांगडमरुकचतुर्भुजां वृषभासनारूढांरुद्रदेवत्यां
यजुर्वेद मुदाहरंतीं भुवर्लोकाधिष्ठात्रीं सावित्रींनामदेवतांध्यात्वा संपूज्ययथेष्टकामंजपंकुर्यात् अथपंचमहायज्ञाः तथाचाश्वला
यनसूत्रं अथातः पंचयज्ञादेवयज्ञोभूतयज्ञः पितृयज्ञोब्रह्मयज्ञोमनुष्ययज्ञइतितद्यदग्नौजुहोति सदेवयज्ञोयद्बलिंकरोतिसभूतयज्ञोय
त्पितृभ्योददातिसपितृयज्ञोयत्स्वाध्यायमधीतेसब्रह्मयज्ञोयन्मनुष्येभ्योददाति समनुष्ययज्ञइतितानेतान्यज्ञानहरहः कुर्वीतेति यद्यपिपा
ठक्रमाद्वैश्वदेवानंतर्यंब्रह्मयज्ञस्यप्राप्तंतथाप्यादौब्रह्मयज्ञएवकार्यः स्वगृह्यविधिनाकृत्वाब्रह्मयज्ञंपुराद्विजः स्वाध्यायतर्पणाभ्यांचगृह्यमे
त्याचरेत्परानिति आश्वलायनस्मृतेः वृत्तौतु वैश्वदेवस्यपुरस्तादुपरिष्टाद्वाब्रह्मयज्ञः कार्योनक्रमनियम इत्युक्तं श्रीमातामहचर

णास्त सचार्वाक्तर्पणात्कार्यः पश्चाद्ब्रह्मातराहुते: वैश्वदेवावसानेवानान्यथर्तेनिमित्ततइति बृहस्पतिवाक्यमाश्वलायनान्यथपरं आश्व
लायनानांतर्पणस्योत्तरांगत्वेनैव तत्सूत्रा स्यात्तेरर्वाक्तर्पणादित्यस्यतदितरान्प्रत्येव सार्थक्यात् तत्साहचर्यात्पश्चाद्धुतिवैश्वदेवावसानेत्ये
तदपितान्प्रत्येवेत्याश्वलायनैस्त्वादावेवब्रह्मयज्ञः कार्यइत्याहुः शिष्टाचारोप्येवमेव अथस्वाध्यायविधिः प्राग्वोदग्वाग्रामान्निष्क्रम्याप
आप्लुत्य शुचौदेशेयज्ञोपवीत्याचम्याक्लिन्नवासादर्भाणामहदुपस्तीर्य प्राक्कूलानां तेषुप्राङ्मुखउपविश्योपस्थंकृत्वादक्षिणोत्तरौपाणीसं
धायपवित्रवंतो विज्ञायतेपांवाएष ओषधीनांरसोयद्दर्भाः सरसमेवतद्ब्रह्मकरोतिद्यावापृथिव्योः संधिमीक्षमाणः संमील्यवायथावायु
क्तमात्मानंमन्येत तथायुक्तोधीयीतस्वाध्यायमोंपूर्वाव्याहृतयः सावित्रीमन्वाहपच्छोर्द्धर्चशः सर्वामितितृतीयं॥ १॥ अथस्वाध्यायम
धीयीतऋचोयजूंषिसामान्यथर्वांगिरसोब्राह्मणानिकल्पानगाथानाराशंसीरितिहासपुराणानीतियदृचोधीतेपय आहुतिभिरेव तद्देवता
स्तर्पयतियद्यजूंषिघृताहुतिभिर्यत्सामानिमध्वाहुतिभिर्यदथर्वांगिरसः सोमाहुतिभिर्यद्ब्राह्मणानिकल्पान्गाथानाराशंसीरितिहासपु
राणानीत्यमृताहुतिभिर्यदृचाधीतेपयसः कुल्या अस्यपितॄन्स्वधाउपक्षरंतियद्यजूंषिघृतस्यकुल्यायत्सामानिमध्वः कुल्यायदथर्वांगिर
सः सोमस्यकुल्यायद्ब्राह्मणानिकल्पान्गाथानाराशंसीरितिहासपुराणानीत्यमृतस्यकुल्याः सयावन्मन्येततावदधीत्यैतयापरिदधाति
नमोब्रह्मणेनमोअस्त्वग्नयेनमः पृथिव्यैनमओषधीभ्यः नमोवाचेनमोवाचस्पतयेनमोविष्णवेमहते करोमीति ॥ २॥ ब्रह्मयज्ञम

प्रयोगेयातोधर्मंव्याख्यास्यामइत्यादिवाक्यानिशिष्टाः पठंतितत्रमूलंनजाने देवतास्तर्पयतिप्रजापतिर्ब्रह्मावेदादेवाऋषयः सर्वाणि छंदांस्योंकारोवषट्कारोव्याहृतयः सावित्रीयज्ञाद्यावापृथिवी अंतरिक्षमहोरात्राणिसांख्याः सिद्धाः समुद्रानद्योगिरयः क्षेत्रौषधिव नस्पतिगंधर्वाप्सरसोनागावयांसिगावः साध्याविप्रायक्षारक्षांसिभूतान्येवमंतान्यथऋषयः शतर्चिनोमाध्यमा गृत्समदोविश्वामित्रोवाम देवोत्रिर्भरद्वाजोवसिष्ठः प्रगाथाः पावमान्यः क्षुद्रसूक्तामहासूक्ताइतिप्राचीनावीतीसुमंतुजैमिनिवैशंपायनपैलसूत्रभाष्यभारतम हाभारतधर्माचार्याजानंतिबाहविगार्ग्यगौतमशाकल्यबाभ्रव्यमांडव्यमांडूकेयागार्गीवाचक्नवीवडवाप्रातीथेयीसुलभामैत्रेयी कहोलं कौषीतकंमहाकौषीतकं पैंग्यंमहापैंग्यंसुयज्ञंसांख्यायनमैतरेयंमहैतरेयंशाकलंबाष्कलंसुजातवक्त्रमौदवाहिंमहौदवाहिंसौजामिंशौनकमा श्वलायनंयेचान्येआचार्यास्तेसर्वेतृप्यंत्विति प्रतिपुरुषंपितृंस्तर्पयित्वागृहानेत्ययद्ददाति सादक्षिणात्यापिविज्ञायतेसयदितिष्ठन् व्रजन्ना सीनः शयानोवायंयंक्रतुमधीतेतेनतेनहास्यक्रतुनेष्टं भवतीतिविज्ञायतेतस्यद्वावनध्यायौयदात्माशुचिर्यद्देशः ॥३॥ अथवृत्तिकारः ॥ सुमंतुरित्यादीनि त्रयोविंशतिवाक्यानितत्रकहोलमित्येवं तर्पयामितिशब्दः कार्यः सर्वत्रप्रतिवाक्यं तर्पणंकुर्यात् प्रतिपुरुषंपितृंस्तर्पयि त्वा प्रतिपुरुषंवचनंपृथक्पृथक् तर्पयेत् नपितृंस्तर्पयामीतिसकृत्तर्पयेदित्येवमर्थ मित्याह प्रतिपुरुषमित्याश्वलायनोक्तमेवतर्पणक्रम माहहारीतः पितृभ्यस्तर्पणंकुर्यात्ततोमातृभ्यएवच ततोमातामहानांचक्रमएषचतर्पणे अत्रबहुवचस्वरसात्पार्वणविधानमेव-

नत्वेकोद्दिष्टविधानं सपत्नमातुस्तुकेवलाया अपिभवति कुर्यान्मातरिजीवन्त्यांपितामह्यानन्तर्पणं पितृपत्न्यः प्रमितास्ताःस्तर्पयेत्केवला
श्च ताइतिशाकलर्षिवचनात् हेमाद्रौसंग्रहे तातांबात्रितयंसपत्नजननीमातामहादित्रयंसस्त्रिस्त्रीतनयादितातजननीस्वभ्रातसस्त्रियः
तातांबात्मभगिन्यपत्यधवयुक् जायापितासद्गुरुः शिष्यासाः पितरोमहालयविधौतीर्थेतथातर्पणे अस्यार्थः जनकादित्रयंजनन्यादि
त्रितयंसपत्नमातामातामहादित्रयंसस्त्रिसपत्नीकंतातजननीस्वभ्रातरः पितृव्यमातुलसोदराः सपत्निकाः तातांबात्मभगिनीपितृ
मातृस्वभगिनीसापत्यासधवाचजायापिताश्वशुरः शेषंसुगमं अत्रान्यवर्णानांशिष्यासत्वादिनाप्रसक्तजलदानंनिषेधति योगया
ज्ञवल्क्यः सवर्णेभ्योजलंदेयंनान्यवर्णेभ्यएवचेति तर्पणप्रकारमाहवसिष्ठ संबंधमनुकीर्त्यैवनामगोत्रमनंतरं वस्वादिरूपंसंकीर्त्य
स्वधाकारेणतर्पयेत् स्वधाशब्दोत्तरंनमः शब्दोपिवाच्यः संबंधनामगोत्रेणस्वधांतेचनमोनमः वस्वादिरूपंसंकीर्त्यतर्पयेत्पितृपूर्वकमि
तिस्मृतिसंग्रहात् नामग्रहणेविशेषमाह बोधायनः शर्मांतंब्राह्मणस्योक्तंवर्मांतंक्षत्रियस्यतु गुप्तांतंचैववैश्यस्यदासांतंशूद्रजन्मनः
चतुर्णामपिवर्णानांगोत्रत्वेपितृगोत्रता पितृगोत्रंकुमारीणामूढानांभर्तृगोत्रनेति स्त्रीणांदांतनामज्ञेयं स्त्रीणांदांतंनामनिर्दिशेदि
तिगोभिलसूत्रात् अथैकहस्तेनतोयेनयः कुर्यात्पितृतर्पणं पितरोनप्रशंसंतिदेवताइतिस्मृतिवचनादेकहस्तेनतर्पणस्यगर्हितत्वा
त्सव्यान्वारंभमाह वृद्धयाज्ञवल्क्यः अन्वारब्धेनसव्येनपाणिनादक्षिणेनतु सव्योत्तराभ्यांपाणिभ्यामथवातर्पणंभवेदिति अत्रपूर्वा-

न्यैव कृ चान्यत्रकृत्तरार्थमन्याप्रतिबोध्यं एकांगवचनेदक्षिणंप्रतीयादनादेशाइत्याश्वलायनसूत्रात्तेषांकेवलदक्षिणांगप्रसक्तौ अन्वा-
रंभेतिकर्तव्यतायाः सूत्रानुक्तायाः अश्विरोधेनस्मृतितोग्रहणेबाधकाभावात् स्मृतिप्रासतीर्थग्रहणादेर्दृष्टिकृत्संमतत्वाच्च जलदा
नसंख्यात्वुक्ताविष्णुपुराणेद्वौचर्षीणां यथान्यायंसकृच्चापिप्रजापतेः पितृणांप्रीणनार्थायत्रिरपः पृथिवीपतइति दद्यादित्युत्तरेणान्व
यः व्यासेनाप्युक्ता एकैकमंजलिंदेवाद्वौद्वौतुसनकादयः अर्हंतिपितरस्त्रींस्त्रींस्त्रियमेकैकमंजलिमिति अत्रसनकादयइत्यनेन-
ऋषयोविवक्षिताः योगिनांआश्वलायनभिन्नान्प्रतिसनकादीनांऋषिषुपरिगणितत्वात् अंजलिर्जलदानंपूर्ववाक्यैकवाक्यत्वात्॥
कासांचित्स्त्रीषुविशेषमाहसांख्यायनः मातृमुख्यास्तुयास्तिस्रस्तासांस्त्रींस्त्रीञ्जलाञ्जलीन् सपत्न्याचार्यपत्नीनांद्वौद्वौदद्याज्जल
जलीइति सपत्नीसपत्नमाता आचार्यस्तुउपनीयदद्वेदमाचार्यः सउदाहृतइति लक्षणोक्तस्तस्य पत्नीप्रत्यंजलिद्रव्यभेदान्मंत्रावृत्तिःसं
ध्यार्घ्यदानवत् एतच्चतर्पणंजलेनकार्यं उदकेनोदकंदद्यात्पितृभ्यश्चकदाचन उत्तीर्यचशुचौदेशेकुर्यादुदकतर्पणमिति शंखोक्तेरितिकेचि
त् तन्न आर्द्रवासाजलेकुर्यादितिपूर्वोक्तहारीतवचनविरोधात् शंखवचनंतुशुष्कवस्त्रवताजलेनदेयमितिपरसुत्रेय हारीतः व-
सिलावसनंशुष्कस्थलेविस्तीर्णबर्हिषि विधिज्ञस्तर्पणंकुर्यान्नपात्रेषुकदाचन पात्राद्वाजलमादायशुभेपात्रांतरेक्षिपेत् जलपूर्णेथवा
गर्तेनस्थलेतुविबर्हिषीति पात्रमाहपितामहः हैमरौप्यमयंपात्रं ताम्रकांस्यसमुद्भवं पितृणांतर्पणेपात्रंमृन्मयंतुपरित्यजेत्इति मरी

नि: सौवर्णेनतुपात्रेणताम्ररौप्यमयेनवा औदुंबरेणखड्गेनपितृणांदत्तमक्षय्यमिति योगयाज्ञवल्क्यः यद्युत्थूर्नोनिषिंचेत्तुतिलासंमि
श्रयेजले अतोन्यथातुसव्येनतिलाग्रात्याविचक्षणैरिति अन्यथानुश्रुनेनतर्पणमित्यर्थः अंगिराः मार्जनंतर्पणंश्राद्धंनकुर्याद्वारिधा
रया कुर्वीतयदिमूढात्मारौरवंनरकंव्रजेदिति अथतिलतर्पणंनिषेधः मरीचिः सप्तम्यांभानुवारेचगृहेजन्मदिनेतथा भृत्यपुत्रकलत्रार्थी
नकुर्यात्तिलतर्पणं अत्रभृत्यादिकामस्यैवनिषेधोनत्वकामस्येति संग्रहे नंदायांभार्गवदिनेकृत्तिकासुमघासुच॥ भरण्यांभानुवारेच
गजच्छायाव्हयेतथेति बौधायनः विवाहेचोपनयनेचौलेसतियथाक्रमं वर्षमर्धंतदर्धंचनेत्यकेतिलतर्पणमिति एकेमुख्याः प्रति
प्रसूवमाहकात्यायनः उपरागेपितुः श्राद्धेपातेमायांचसंक्रमे निषेधेपीहसर्वत्रतिलैस्तर्पणमाचरेत् पितुर्ग्रहणंमात्रादेरुपलक्षणं–
सर्वत्रनिषेधेप्राप्तउपरागादिषुप्रसूयतइतिभावः गर्गः कृष्णेभाद्रपदेमासिश्राद्धंप्रतिदिनंभवेत् पितृणामन्वहंकार्यं निषिद्धाहेपितर्पणं
पृथ्वीचंद्रोदये तीर्थेतिथिविशेषेचगंगायांप्रेतपक्षके निषिद्धेपिदिनेकुर्यात्तर्पणंतिलमिश्रितं अत्रतीर्थग्रहणेनैवगंगाप्राप्तौपुनर्गं
गाग्रहणंसर्वदा त्रितिलप्राप्त्यर्थंतर्पणांतेवस्त्रानांजलिर्देयः तन्मंत्रश्चप्रयोगेवक्ष्यते योगयाज्ञवल्क्यः वस्त्रंनिष्पीडितंतोयंस्नात
स्योच्छिष्टभागिनां भागधेयंश्रुतिःप्राहतस्मान्निष्पीडयेत्स्थले अन्नप्रकीरवत्तस्याप्यपसव्येनपीडिनं स्मृत्यंतरे वस्त्रंचतुर्गुणीकृत्य
पीडयेच्चजलाद्बहिः वामप्रकोष्ठेनिक्षिप्यद्विराचम्यशुचिर्भवेत् अन्यत्रनिक्षिपेद्यस्तुपितृहाचोपजायते स्नानवस्त्रंतर्पणात्प्राङ्नं[illegible]

डयेत् तदाहवृद्धयोगी यावद्देतानृषींश्चैवपितॄंश्चापिनतर्पयेत् तावन्नपांड्यएवस्त्रंयेनस्नातोभवेन्नरइति तर्पणाकरणेप्रत्यवाय-
श्रुतिः पुराणसमुच्चये देवतांश्चमुनींश्चैवपितृभ्योहिनतर्पयेत् देवादीनामृणीभूत्वानरकंसव्रजेद्ध्रुवमिति शाकलः तर्पणेनैत्यकंकुर्याद्ब्र-
ह्मयज्ञः पुरः सरं ग्रहणादिनिमित्तेषुब्रह्मयज्ञंविनाभवेदिति स्मृतिसारे जल्पांतेनिल्दर्भास्तुयोनुष्ठानाययाचते नानुष्ठानफलंतस्यदा
तुरेवहितत्फलमिति ब्रह्मयज्ञादौऋष्यादिस्मरणंनकुर्यादित्याह ॥ भगवान् ॥ नचस्मरेदृषिच्छंदः श्राद्धेवैतानिकेमखे ब्रह्मयज्ञेचवैत
द्वत्तथोंकारंतुवर्जयेत् कारिकायां दर्भान्बहून्कुर्चोद्देशेप्रागग्रानास्तृणात्यथ दर्भेषूपविशेत्कर्मण्यत्रप्राङ्मुखएवसन् कृत्वोपस्थेकरे-
सव्येउत्तानंप्राग्दिगंगुलौ पवित्रेस्थापयेदुत्केप्रागग्रेदक्षिणेनतु न्यंचंप्रागंगुलंतेनसंदध्याद्दक्षिणेकरं ॐ पूर्वांव्याहृतीस्तिस्रः समन्
ग्राश्चसकृद्वदेत् पच्छस्त्वर्धर्चशः सर्वांसावित्रींत्रिर्वदेदथ ऋग्विधाने अग्निमीळेजपेत्सूक्तंपापघ्नंश्रीकरंपरं पारायणफलंतस्यदेवा
नांस्यात्सहस्रशइति अथब्रह्मयज्ञप्रयोगः वेदपुरुषायनमइतिप्रदक्षिणीकृत्यासनेउपविश्यद्विराचम्यप्राणानायम्य ममउपात्त॰ ब्र
ह्मयज्ञेनयक्ष्येइतिसंकल्प्य विद्युदसिविद्यमेपाप्मानमृतात्सत्यमुपैमिइतिमंत्रेणापउपस्पृश्यवामजानू परिदक्षिणंपादंनिधाय स्थल
संकोचे वामपादोपरिदक्षिणांगुष्ठंनिधायदक्षिणजानुनिकुशपवित्रगर्भंप्रागंगुलिमुत्तानंसव्यपाणिंनिधायतदुपरिदक्षिणंपाणिंप्रागं
गुलिमेवंन्यंचंनिधायव्याहृतिपूर्वांपच्छोर्धर्चशः सर्वांसावित्रींपठित्वा ॐ भूर्भुवः स्वः तत्सवितुर्वरेण्यं भर्गोदेवस्यधीमहि धियोयो

नः प्रचोदयात् तत्सवितुर्वरेण्यंभर्गोदेवस्यधीमहि धियोयोनः प्रचोदयात् तत्सवितुर्वरेण्यंभर्गोदेवस्यधीमहिधियोयोनः प्रचो
दयात् अग्निमीळेपुरोहितंयज्ञस्यदेवमृत्विजं होतारंरत्नधातमं अग्निः पूर्वेभिर्ऋषिभिरीड्योनूतनैरुत सदेवांएहवक्षति अग्निना
रयिमश्नवत्पोषमेवदिवेदिवे यशसंवीरवत्तमं अग्नेयंयज्ञमध्वरंविश्वतः परिभूरसि सइद्देवेषुगच्छति अग्निर्होताकविक्रतुः सत्य
श्चित्रश्रवस्तमः देवोदेवेभिरागमत् ॥१॥ यदंगदाशुषेत्वमग्नेभद्रंकरिष्यसि तवेत्तत्सत्यमंगिरः उपत्वाग्नेदिवेदिवेदोषावस्तर्धि
यावयं नमोभरंतएमसि राजंतमध्वराणांगोपामृतस्यदीदिविं वर्धमानंस्वेदमे सनः पितेवसूनवे अग्नेसूपायनोभव सचःस्वा
नः स्वस्तये ॥२॥ अग्निर्वैदेवानामवमोविष्णुःपरमः अथमहाव्रतंएषपंथाएतत्कर्म अथातः संहितायाउपनिषत् विदामघव
न्विदा महाव्रतस्यपंचविंशतिंसामिधेन्यः इषेत्वोर्जेत्वा अग्नआयाहिवीतये शन्नोदेवीरभिष्टये अथैतस्यसमाम्नायस्य स
माम्नायः समाम्नातः मयरसतजभनलगसंमितं गोःग्मा पंचसंवत्सरमयं अथशिक्षांप्रवक्ष्यामि वृद्धिरादैच् यदिंद्रोदाश
राज्ञेमानुषंव्यगाहथाः इदंजनाउपश्रुत योगीश्वरंयाज्ञवल्क्यं नारायणंनमस्कृत्य अथातोधर्मंव्याख्यास्यामः अथातोधर्मजि
ज्ञासा अथातोब्रह्मजिज्ञासा इतिपठित्वा तच्छंयोरावृणीमहेगातुंयज्ञायगातुंयज्ञपतयेदैवीस्वस्तिरस्तुनः स्वस्तिर्मानुषेभ्यः ऊर्ध्वं
जिगातुभेषजंशन्नोअस्तुद्विपदेशंचतुष्पदे नमोब्रह्मणेनमोअस्त्वग्नयेनमः पृथिव्यैनमओषधीभ्यः नमोवाचेनमोवाचस्पत

यंनमोविष्णवेमहतेकरोमिइतित्रिरुच्चार्य दृषिरसिवृष्ण्वमेपाप्मानमृतात्सत्यमुपागामित्यपःस्पृष्ट्वासव्यान्वारब्धेनदक्षिणहस्तेनप्र
जापत्यादिमंत्रैर्यथावचनंतृप्यतुतृप्यतांतृप्यंत्वित्यंतैस्तर्पयेत् अत्रद्यावापृथिवीतृप्यतामितिलोटः प्रथमपुरुषद्विवचनंप्रयो-
क्तव्यं तृप्येतामितिलोडात्मनेपदंप्रयुंजतेप्राचः तदशुद्धं तृपप्रीणनइत्यस्यधातोःपरस्मैपदित्वात् नचलिङि पर स्मैपदंभवेदि
तिवाच्यं येचान्येआचार्यास्तेसर्वेतृप्यंत्विति वक्तुराश्वलायनस्यलोट्प्रयोगस्यैवविवक्षितत्वात् प्रजापतिस्तृप्यतु ब्रह्मातृप्य०
वेदास्तृप्यं० देवास्तृप्यं० ऋषयस्तृप्यं० सर्वाणिछंदांसितृप्यंतु ओंकारस्तृप्य० वषट्कारस्तृ० व्याहृतयस्तृप्यं० सावित्रीतृप्य०
यज्ञास्तृप्यं० द्यावापृथिवीतृप्येतां अंतरिक्षंतृप्य० अहोरात्राणितृप्यं० सांख्यास्तृप्यं० सिद्धास्तृप्यं० समुद्रास्तृप्यंतु० नद्यस्तृप्यं
तु गिरयस्तृप्यं० क्षेत्रौषधिवनस्पतिगंधर्वाप्सरसस्तृप्यं० नागास्तृप्यं० वयांसितृप्यं० गावस्तृप्यं० साध्यास्तृप्यं० विप्रास्तृप्यंतु
यक्षास्तृप्यं० रक्षांसितृप्यंतु भूतानितृप्यंतु एवमंतानितृप्यंत्वित्येकोनत्रिंशन्मंत्रैः कुशाग्रैर्देवतीर्थेनैकवारंतर्पयित्वा निवीतीश
तर्चिनस्तृप्यं० माध्यमास्तृप्य० गृत्समदस्तृप्यतु विश्वामित्रस्तृप्य० वामदेवस्तृप्य० अत्रिस्तृप्य० भरद्वाजस्तृप्य० वसिष्ठस्तृ
प्य० प्रगाथास्तृप्यं० पावमान्यस्तृ० क्षुद्रसूक्तास्तृप्यं० महासूक्तास्तृप्यंत्विति द्वादशमंत्रैःकुशमध्येनऋषितीर्थेनद्विःप्रत्येकं
तर्पयित्वा प्राचीनावीती ॥ सुमंतुजैमिनिवैशंपायनपैलसूत्रभाष्यभारतमहाभारतधर्माचार्यास्तृप्यंतु जानंतिबाहविगा

र्घ्यगौतमशाकल्यबाभ्रव्यमांडव्यमांडूकेयास्तृप्यं० गर्गीवाचक्नवीतृप्य० वडवाप्रातिथेयीतृप्य० सुलभामैत्रेयीतृप्य० कहोळंतर्पयामि कौ
षीतकंत० महाकौषीतकंतर्पयामि पैंग्यंतर्पयामि महापैंग्यंत० सुयज्ञंतर्प० सांख्यायनंत० ऐतरेयंत० महैतरेयंतर्प० शाकलंत० बाष्कलंत०
सुजातवक्त्रंत० औदवाहिंतर्पयामि महौदवाहिंत० सौजामिंत० शौनकंतर्पयामि आश्वलायनंत० येचान्ये आचार्यास्तेसर्वेतृप्यं
त्विति त्रिस्त्रयोविंशतिमंत्रैः पितृतीर्थेन कुशामूलैस्तर्पयेत् ततोस्मत्पितरममुकशर्माणंगोत्रं वसुरूपंस्वधानमस्तर्पयामि एवंपिताम-
हादींस्तर्पयित्वा आब्रह्मस्तंबपर्यंतं देव र्षिपितृमानवाः तृप्यंतुपितरः सर्वे मातृमातामहादयः अतीतकुलकोटीनां सप्तद्वीपनिवा
सिनां आब्रह्मभुवनाल्लोका निदमस्तु तिलोदकमितित्रिर्दत्वा येकेचास्मत्कुलेजाता अपुत्रागोत्रिणोमृताः तेगृण्हंतुमयादत्तंवस्त्रनि
ष्पीडनोदकमितिचतुर्गुणमुपरि दशवस्त्रंस्थलेवाम भागेनिष्पीड्योपवीती द्विराचामेत् अथाशौचे सतिनित्य स्नानादिकंकार्यंस्मृत्य-
र्थसारे सूतकादौनित्यस्नानशौचान्नबलिदानप्राणाहुति पात्रकरणादयोभुजिनियमा अस्पृश्यस्पर्शनस्नानादिकंचेति सर्वंकर्तव्यमे
वेति अत्रनित्यस्नानंनिषेधकवचनाभावात् कल्पमार्जनाघमर्षणांगसहितंकार्यं संध्याप्रकारमाहजाबालिः अर्घ्यांतामानसी संध्याप्रा-
णायामविवर्जिताइति भरद्वाजः सूतकेमृतकेचापिप्राणायाममंत्रकं तथामार्जनमंत्रांस्तुमनसोच्चार्यमार्जयेत् गायत्रींसम्यगुच्चा
र्यसूर्यायार्घ्यंनिवेदयेत् मार्जनंतुनवाकार्यमुपस्थानंनचैवहि गायत्रीं दशवारंजपेदित्याश्वलायनः आपन्नश्चाशुचिः कालेतिष्ठन्नपि

जपेद्दशेति आपन्न आपद्ग्रस्तः अशक्तश्चिराशौचवान् ॥ सूतकेमृतकेचैवरोगोत्पत्तौ तथाध्वनि मानसींचजपेत्संध्यांकुश
वारिविवर्जितः पराशरः देशभंगेप्रवासेचव्याधिषुव्यसनेषुचरक्षेदेवस्वदेहंतु पश्चाद्धर्मंसमाचरेत्इति सूतकेविष्णुपूजानकार्या तदु
क्तं सूतकेइत्युपक्रम्यहेमाद्रौवराहे पूर्वसंकल्पितंयत्तुव्रतंसुनियतव्रतैः तत्कर्तव्यंनरैःश्राद्धदानार्चनविवर्जितमिति पंचयज्ञाअपिन
कार्याः होमंतत्रप्रकुर्वीतशुष्कान्नेनफलेनवा पंचयज्ञविधानंतुनकुर्यान्मृत्युजन्मनोरितिसंवर्तनिषेधात् होमःसायंप्रातः क्रियमा
णोनित्यहोमः सतुकार्यएव याज्ञवल्क्योपि वैतानोपासनाः कार्याः क्रियाश्चश्रुतिचोदनादिति यद्यपिअत्रकार्याइत्युक्तं तथाप्यस
गोत्रेणकारणीयाः तथाचबृहस्पतिः सूतकेमृतकेचैव अशक्तौश्राद्धभोजने प्रवासादिनिमित्तेषुहावयेन्नतुहापयेदितिजातूकर्ण्यो
पि सूतकेतुसमुत्पन्नेस्मार्तकर्मकथंभवेत् पिंडयज्ञंचरुहोमंअसगोत्रेणकारयेदिति पिंडयज्ञः पिंडपितृयज्ञः चरुहोमः स्थालीपाकश्रव
णाकर्माश्वयुज्याग्रयणप्रत्यवरोहणाष्टकादिहोमः अत्रद्रव्यत्यागस्तु यजमानेनकार्यइतिविज्ञानेश्वरः अपरेतु कल्पसूत्रभाष्य
कारादयः सर्वेनिबंधकारा वैतानिकेहोम कर्मणिस्वकर्तृत्वंवदंति कर्मवैतानिकंकार्यंस्नानोपस्पर्शनात्स्वयं जन्महान्योर्वितानस्यकर्म
त्यागोनविद्यते शालाग्नौकेवलहोमः कार्यएवान्यगोत्रजैरित्यादिहारीतवचनात् प्रसंगाच्छूद्रजातीनांपितृसंतृप्तिकारणं तर्पणंप्रव
दाम्यत्रमूलवाक्यानुसारतः मदनपारिजातेयोगयाज्ञवल्क्यः तृप्यत्विति समुच्चार्य तृप्यतामित्यथापिवा विधितः प्रक्षिपेत्तोयंदेवा

दीनामशेषतः देवानाहसएव ब्रह्माणंतर्पयेत्पूर्वं विष्णुंरुद्रंप्रजापतिं देवांश्छंदांसिवेदांश्चऋषींश्चैवसनातनान् आचार्यांश्चैवगंध
र्वानाचार्यतनयांस्तथा संवत्सरंसावयवंदेवीश्चाप्सरसस्तथा तथादेवानुगान्नागान्सागरान्पर्वतानपि सरितोथमनुष्यांश्चयक्षा
न्रक्षांसिचैवहिपिशाचांश्चसुपर्णांश्चभूतान्यथपशूंस्तथा वनस्पतीनोषधींश्चभूतग्रामंचतुर्विधं तत्रैवविष्णुसमुच्चयेततःकु
तानीवीतंतुयज्ञसूत्रमतंद्रितः प्राजापत्येनतीर्थेनमनुष्यांस्तर्पयेत्पृथक् मनुष्यानाह कार्ष्णाजिनि ।। सनकश्चसनंदश्चतृतीय-
श्चसनातनः कपिलश्चासुरिश्चैववोढुः पंचशिखस्तथा एतेब्रह्मसुताःसप्तमनुष्याःपरिकीर्तिताः मरीचिमत्रिमंगिरसंपुलस्त्यं
पुलहंक्रतुं प्रचेतसंवसिष्ठंचभृगुंनारदमेवच देवब्रह्मऋषीन्सर्वांस्तर्पयेदक्षतोदकैरितियोगयाज्ञवल्क्यः अपसव्यंततःकृत्वा
प्राचीनावीती?प्राचीनावीती
अथप्रयोगः स्नानोत्तरमासनादावुपविष्टःसकुशहस्तद्वयेनदेवतीर्थेनतर्पयेत् ब्रह्मातृप्यतां विष्णुस्तृप्यतां रुद्रस्तृ॰ प्रजापति
स्तृ॰ देवास्तृप्यं॰ वेदास्तृ॰ ऋषयस्तृ॰ पुराणाचार्यास्तृ॰ गंधर्वास्तृप्यंतां इतराचार्यास्तृ॰ संवत्सरःसावयवस्तृप्यतां॰ देव्य
स्तृ॰ अप्सरसस्तृ॰ देवानुगास्तृ॰ नागास्तृ॰ सागरास्तृ॰ पर्वतास्तृ॰ सरितस्तृप्यं॰ मनुष्यास्तृ॰ यक्षास्तृप्यं॰ रक्षांसि-
तृ॰ पिशाचास्तृ॰ सुपर्णास्तृ॰ भूतानितृ॰ पशवस्तृप्यंतां वनस्पतयस्तृ॰ ओषधयस्तृप्यं॰ भूतग्रामश्चतुर्विधस्तृ॰

॥१७॥ २०॥ अथऋषयः॥निवीती॥उदगग्रदर्भमध्येनऋषितीर्थेनद्वौद्वावंजलीदद्यात् सनकस्तृप्यतु सनंदनस्तृ॰ सनातनस्तृ॰ कपिलस्तृ॰ आसुरिस्तृ॰ वोढुस्तृ॰ पंचशिखस्तृ॰ मरीचिस्तृ॰ अत्रिस्तृ॰ अंगिरास्तृ॰ पुलस्त्यस्तृ॰ पुलहस्तृ॰ क्रतुस्तृ॰ प्रचेतास्तृ॰ वसिष्ठस्तृ॰ भृगुस्तृ॰ नारदस्तृप्यतां १७ ततः प्राचीनावीती दक्षिणास्यः पितृतीर्थेनत्रींस्त्रीनंजलीन्संप्रयच्छेत् वसवस्तृप्यंतां रुद्रास्तृ॰ आदित्यास्तृ॰ मरुतस्तृ॰ अश्विनौतृप्येतां ततः पित्रादीनस्मत्पितामुकदासोमुकगोत्रस्तृप्यतां अत्रवस्वादिनामसहिता नाम सहितानां वापित्रादीनां तर्पणंकार्यमितिमदनपारिजातः एवंपितामहप्रपितामहयोरपि अस्मन्माताअमुक गोत्रा अमुकदेवीतृप्यतां एवंसर्वेषांप्रमितानां तर्पणंकृत्वातटेतिलांजलिंनिक्षिपेदेतैर्मंत्रैः देवास्तथासुरायक्षानागगंधर्वोरगराक्षसाः पिशाचागुह्यकाः सिद्धाःकूष्मांडाभैरवादयः जलेचराभूमिलयावाय्वाधाराश्चजंतवः तृप्तिमेतेनयांत्वाशुमद्दत्तेनांबुनाखिलाः नरकेषुसमस्तेषुयातनासुचयेस्थिताः तेषामाप्यायनायैतद्दीयतेसलिलंमया येबांधवाबांधवायेयेन्यजन्मनिबांधवाः तेतृप्तिमखिलायांतुयश्चास्मत्तोभिवांछति यत्रक्वचनसंस्थानांक्षुत्तृष्णोपहतात्मनां तेषांहिदत्तमक्षय्यमिदमस्तुतिलोदकं येमेकुलेलुप्तपिंडाः पुत्रदारविवर्जिताः मातृवंश्यामृतायेचपितृवंश्यास्तथैवच तेषां॰ ततोयेकेचास्मत्कुलेइतिमंत्रेणवस्त्रंनिष्पीड्याचामेत् जीवत्पितुर्वस्वादिपंचस्थानेषुविशेषमाहस्मृतिचंद्रिकायां योगयाज्ञवल्क्यः कव्यवाडनलःसोमोयमश्चैवार्यमातथा अग्निष्वात्ताःसोमपाश्चतथाबर्हिषदो

पित्र यदिस्याज्जीवपितृकएतान्विद्यान्ननोपितॄन् तिलतर्पणनिषिद्धकालस्तु मत्कृतश्राद्धचंद्रिकायांद्रष्टव्यः अत्रवक्तव्यमपिशू-
द्राणांवैश्वदेवादिकर्माननुष्ठानान्नोच्यतइत्यास्तांतावत् इत्याचारार्के शूद्रतर्पणप्रयोगः प्रासंगिकः अथवैश्वदेवःसचवैश्वदेवंपुरा-
कृत्वा नित्येचाभ्युदयेतथा स्वाभीष्टदेवतादिभ्योनैवेद्यंविनिवेदयेत् अकृत्वावैश्वदेवंतुनैवेद्यंयोनिवेदयेत् तदन्नंचनगृण्हंतिदेवादि
ष्ववादयेोध्रुवमित्याश्वलायनस्मृतेः सएषदेवयज्ञोहरहर्गोदानसंमितः सर्वाभीष्टप्रदः स्वर्ग्यापवर्ग्यश्चतस्मादेनमहरहः कुर्वीततमेनं
वैश्वदेवंहुतशेषेणपृथगन्नेन वाकुर्यान्नास्यशेषेणवैश्वदेवंकुर्यादिति गृह्यपरिशिष्टाच्च नैवेद्यदर्शनात्पूर्वंकार्यः सएषदेवयज्ञश्चावा-
हनादिनैवेद्यांतः पंचायतनपूजारूपोदेवयज्ञइत्यर्थः यत्तुविष्णोर्निवेदितान्नेनयष्टव्यंदेवतांतरं पितृभ्यश्चापितद्देयं तदानंत्यायक
ल्पतेइतिस्कांदवचनंतत् विगीतत्वान्नादरणीयमथवाकेवलवैष्णवपरं अथवैश्वदेवविधिः कारिकायां गृहस्थोवैश्वदेवाख्यंकर्मप्रारभ
तेदिवा तत्रनास्त्यत्रभगवद्गृह्यकारवचोयथा औपासनाग्निमन्यंवा समिध्यायहविर्म्रजं अन्यंपाकाग्निंसमिध्यप्रज्वाल्य प्रज्वालनंमु
खेनैव कार्यमित्याहस्मृति चंद्रिकायांकात्यायनः जुहूयश्चहुतेचैवपाणिनाशूर्पदारुभिः नकुर्यादग्निधमनं नकुर्याद्व्यजनादिना॥ मुखे-
नैवधमेदग्निंमुखादेषो व्यसीयतइति मुखेनधमनंनलिकादिव्यवधानेन नसाक्षात्कार्यंउच्छिष्टपातसंभवात् आश्वलायनः सायंप्रात
वैश्वदेवो कर्तव्योबलिकर्मच अनश्नतापिकर्तव्यावन्यथाकिल्बिषी भवेत् वैश्वदेवौदिवानक्तंनभवेच्चपृथक्पृथक् प्रातरेवाह्निराहृत्या

कुर्याद्दासहितौद्विजइति शातातपः वैश्वदेवः प्रकर्तव्यः पंचसूनापनुत्तये पंचसूनागृहस्थस्य वर्त्ततेहरहः सदा कंडणीपेषणीचुल्लि
जलकुंभउपस्करः सूनाहिंसास्थानानि उपस्करः शूर्पादिः अथवैश्वदेवविधिर्गृह्यपरिशिष्टे अथवैश्वदेवोदिवास्यप्रारंभोनान्नपाक-
यज्ञतंत्रमौपासनंपचनंवापरिसमुह्यपर्युक्ष्यायतनमलं कृत्यसिद्धंहविष्यमधिश्रित्याद्भिः प्रोक्ष्योद्गुद्वास्याग्नेः प्रत्यग्दर्भेषुनिधाय
सर्पिषाभ्यज्यसव्यंपाणितलंस्वदयेन्यस्यसकृदवदानेनपाणिनाजुहुयादन्नाभावेतंडुलादिभिः कुर्यादंतेचपरिसमुह्यपर्युक्षेदकेनान्नतं
त्रमिति शौनकः त्रिधाविभज्यसिद्धान्नंत्रिःप्रोक्ष्य पुरतः स्थितंपर्यग्निकरणंकुर्यात्सिद्धान्नस्याप्ययंविधिः छंदोगपरिशिष्टे यस्मि
न्नग्नौभवेत्पाकोवैश्वदेवस्तुतत्रवै उत्तानेनतुहस्तेन त्वंगुष्ठाग्रेणपीडितं संहतांगुलिपाणिस्तु वाग्यतोजुहुयाद्धविरिति व्यासः जुहुयात्स
र्पिषाभ्यक्तं तैलक्षारविवर्जितं दध्याक्तंपायसाभ्यक्तं तदभावेंभसापिवा व्यासः होमान्नदानरहितंनभोक्तव्यंकदाचन आश्वला
यनः वसतामेकपाकेन विभक्तानामपिप्रभुः एकस्तुचतुरोयज्ञान् कुर्याद्भाग्यज्ञपूर्वकान् वाप्यज्ञोब्रह्मयज्ञः सतुसर्वेषांपृथगेवभवति
पृथगप्येकपाकानां ब्रह्मयज्ञोद्विजन्मनां अविभक्ताविभक्ताश्चपृथक्पाकाद्विजातयः कुर्युः पृथक्पृथक्यज्ञान् भोजनात्प्रागृदिने
दिने गोभिलः यद्येकस्मिन्कालेबहुधान्नंपच्येतगृहपतिर्महान सादेवैतद्बलिंतत्र कुर्वीतेति आश्वलायनमते विभक्तानामप्ये
कपाकेज्येष्ठस्यैवाधिकारो नपृथक् पाक भेदे विभक्तानामपिभिन्नएवाधिकारइति गोभिलमतेत्तु अविभक्तत्वावृत्पुत्रादि

भिः पृथक्पाकेकृतेसत्यपि ज्येष्ठस्यैवाधिकारो नान्येषां. अत्राविभक्तानांपृथक्पाकेपृथक्वैश्वदेवाकरणाकरणविरोधेप्रासेव्यवस्थितो
यंविकल्पः आश्वलायनैस्तदुक्तेः पृथक्कार्यः तदन्यैरेकएवेति देवताक्रममाहाश्वलायनः अथसायंप्रातः सिद्धस्यहविष्यस्यजु
हुयादग्निहोत्रदेवताभ्यः सोमायवनस्पतयेऽग्नीषोमाभ्यामिंद्राग्निभ्यांद्यावापृथिवीभ्यांधन्वंतरयइंद्राय विश्वेभ्योदेवेभ्यो ब्रह्मणेस्वाहेत्य
थबलिहरणमेताभ्यश्चैवदेवताभ्योद्भ्य ओषधिवनस्पतिभ्यो गृहायगृहदेवताभ्योवास्तुदेवताभ्यइंद्रायेंद्रपुरुषेभ्योयमाययमपुरुषे-
भ्यो वरुणायवरुणपुरुषेभ्यः सोमायसोमपुरुषेभ्यइति प्रतिदिशंब्रह्मणेब्रह्मपुरुषेभ्यइति मध्येविश्वेभ्योदेवेभ्यः सर्वेभ्योभूतेभ्योदि
वाचारिभ्यइति दिवानक्तंचारिभ्यइतिनक्तंरक्षोभ्यइत्युत्तरतः स्वधापितृभ्यइति प्राचीनावीती शेषंदक्षिणानिनयेदिति अत्रस्वधापितृ
भ्यइति गृह्यव्याख्यानेवृत्तिकृतैवपितृयज्ञः पितृयज्ञार्थमन्वहं ब्राह्मणभोजनंकर्तव्यमितिसिद्धमिति यदुक्तंतत्पंचमहायज्ञांतः पाति-
पितृयज्ञविषयंनतुनित्यश्राद्धविषयं तस्यस्मृतितोविधानात् यातुश्राद्धंवापित्र्यंयज्ञस्यात्पित्र्योबलिरथापिवेति कात्यायनोक्तलक्ष
नेनित्यश्राद्धस्यापितृयज्ञोक्तिः सायेषांसूत्रेपित्र्यबलिर्नोक्तस्तेषांनित्यश्राद्धमेवपितृयज्ञइतिसूचनाय नन्तुतर्ह्याश्वलायनादीनांस्व-
धापितृभ्यइति पित्र्यबलिनैवपितृयज्ञसिद्धेर्नित्यश्राद्धं नालंइतिचेन्न तस्यदेवताभेदेन कर्मांतरत्वात् तथाहि पंचयज्ञप्रकरणेस्व-
धा पितृभ्यइत्यविशेषेणोक्तत्वादेतद्व्यापिवृविषयंनित्यश्राद्धेतुनित्यश्राद्धंतुयत्नामदैवहीनंनतुच्यवे वसुषट्पुरुषंदेयंदक्षिणापिंड

वर्जितमिति पुराणवचनेदेवतासंख्या विधानान्नित्यश्राद्धंमनुष्यंपितृविषयं तस्माद् जीवत्पितृकेणदेवपितृमनुष्यापितृत्रस्यैकर्मद्वयं
कर्तव्यं जीवत्पितृकेणवैश्वदेवप्रकरणोक्तएवपितृयज्ञः कार्यइत्यलंविस्तरेण विश्वदीपे पितृयज्ञान्नशेषेणतथानैर्ऋत्यकोणके वा
यव्यकोणेतुतथाश्नतोबलिमथाहरेदिति आहजैमिनिः यत्किंचिज्जुहुयादग्नौतत्सर्वंत्यागपूर्वकं अन्यथाकुरुतेयस्तु नरकेसविपच्यते
शौनकः भूतयज्ञेपिमंत्राणांस्वाहाकारोभवेदिहेति सकृत्कृतेनवैश्वदेवेनपक्वः पक्ष्यमाणश्चसर्वोपिपाकः संस्कृतोभवतीत्याह गोभि
लः यद्येकस्मिन्कालेबहुधान्नंपच्येतगृहपतिर्महानसादेवेनहुत्वा बलिंसकृदेवकुर्वीतेति अन्नाभावेद्रव्यांतरंचतुर्विंशतिमते अलाभेयेनके
नापिफलशाकोदकादिभिः पयोदधिघृतैर्वापिवैश्वदेवंस्रुवेणतु हस्तेनाग्न्यादिनाकुर्यादद्भिरंजलिनाजले तत्रापियदनीयंतेनैवहो-
मः तथाचपरिशिष्टे शाकंवायदिवापत्रंमूलंवायदिवाफलं संकल्पयेद्यदाहारंस्तेनैवजुहुयात्सुधीः पाणिनैकेनजुहुयात्शूद्रसव्यंनि-
धायवै वर्ज्यद्रव्याणिसंग्रहे कोद्रवंचणकंमाषंमसूरंचकुलित्थकं क्षारंचलवणंचैववैश्वदेवेविवर्जयेत् इति अत्रवैश्वदेवेयज्ञत्रयंभवतिदे
वयज्ञोभूतयज्ञः पितृयज्ञइतिपूर्वोक्तसूत्रात् तत्रप्रातर्वैश्वदेवमादौकृत्वासायंवैश्वदेवइतिक्रमोनतुसायंप्रातरितिप्रथमंदिवाचारि
भ्योबल्युक्तेः अत्रस्रुवाकारध्वजाकारनराकार वल्मीकारव्यचक्राकार इतिपंचविधाकारे भूतयज्ञेमुख्याचक्राकृतिरित्याह शौनकः
पंचस्वेतेषुविप्राणांमुख्याचक्राकृतिर्भवेत् चक्राकारमथांतरंकुर्यादग्निसमीपतः चक्राकारेणयोविप्रः सदाभूतबलिंहरेत् सर्वपापविनि

मुक्तो विष्णुसायुज्यमाप्नुयादितिदेवभूतशेषेण भूतयज्ञंकुर्यादित्याह योगयाज्ञवल्क्यः देवेभ्यस्तु हुतादन्नाच्छेषाद्भूतबलिंहरेत् भूतयज्ञः सवैप्रोक्तोभूतिदः सर्वदेहिनामिति एवंकृतवैश्वदेवस्यबहिर्बलिमाहमनुः शुनांचपतितानांचश्वपचांपापरोगिणां वायसानांकृमीणांचशनकैर्निक्षिपेद्भुवि शाकलः सायंस्यात्पितृयज्ञांतंब्रह्मयज्ञविवर्जितमिति पितृयज्ञांतमित्यस्मन्यामनुष्ययज्ञस्यापिनिवृत्तिः प्रतीयते अथवैश्वदेवप्रयोगः अग्नेः पश्चात्प्राङ्मुखउपविश्याचम्यदेशकालौनिर्दिश्यममोपात्तदुरितक्षयात्मसंस्कारान्नसंस्कारद्वाराचप्रातर्वैश्वदेवंकरिष्ये सायंतुसायंवैश्वदेवमितिद्वयोस्तंत्रेणानुष्ठानपक्षेतु प्रातःसायंवैश्वदेवौ तंत्रेणाकरिष्यइतिसंकल्प्य एत्यग्नेराहूगणोगोतमोग्निस्त्रिष्टुप् अग्न्यावाहनेविनियोगः ॐ एत्यग्नइहहोतानिषीदादब्धस्सुपूरएताभवानः अवतांत्वारोदसीविश्वमिन्वेयजामहेसौमनसायदेवान् इत्यावाह्य वेणुधमन्याप्रबोध्य चत्वारिशृंगागोतमोवामदेवोग्निस्त्रिष्टुप् अग्निमूर्तिध्यानेविनियोगः ॐ

चत्वारिशृंगात्रयोअस्यपादाद्वेशीर्षेसप्तहस्तासोअस्य त्रिधाबद्धोवृषभोरोरवीतिमहोदेवोमर्त्यांआविवेशा इतिध्यात्वा परिसमूह्यपर्युक्षणेकृत्वासिद्धमन्नंपात्रांतरेनिधायाग्नावधिश्रित्य प्रोक्ष्योदगुद्वास्यपश्चिमभागेनिधायत्रेधाविभज्यत्रिःप्रोक्ष्यपर्यग्निकृत्वासर्पिषाभ्यज्याग्निंविश्वानिनइत्यलंकृत्य सव्यंपाणितलंहृदिन्यस्यदक्षिणहस्तेनदक्षिणभागादन्नमादायांगुष्ठाग्रेणपीडितंसंहतांगुल्युत्तानपाणिनासमंत्रंजुहुयात् तत्रमंत्राः सूर्यायस्वाहा सूर्यायेदंनममेत्यादित्यागः सर्वत्रापिज्ञेयः प्रजापतयेस्वाहेत्यचैरु-

तैव सोमाय वनस्पतये॰ अग्नीषोमाभ्यां॰ इंद्राग्निभ्यांस्वाहा द्यावापृथिवीभ्यां॰ धन्वंतरयेस्वाहा इंद्राय॰ विश्वेभ्योदेवेभ्य॰ ब्र-
ह्मणेस्वा॰ सायंतनवैश्वदेवाहुतयोग्नयेस्वा॰ प्रजापतयेइत्यादि ब्रह्मण्यंतः पूर्ववन्नवाहुतीर्हुत्वोनंवम इत्युपस्थाय परिसमूहनपर्युक्षणे
कृत्वा विभूतिंधारयेदितिदेवयज्ञः अथभूतयज्ञः भूमिंप्रोक्ष्यमध्यभागादन्नमादाय प्राचीमारभ्यईशानीपर्यंतंच त्र्याकारंनैर्ऋतेर्व-
णसूर्यायस्वाहेतिपूर्वोक्तैर्दशभिः अद्भ्यः स्वाहा ओषधिवनस्पतिभ्य॰ गृहायगृहदेवताभ्यः वास्तुदेवताभ्यस्वाहेतिपंचभिः प्रदत्वा
चक्राद्बहिः प्राच्यांप्राक्संस्थंइंद्रायइंद्रपुरुषेभ्य॰ दक्षिणतउदक्संस्थं यमाययमपुरुषेभ्यः॰ पश्चिमतःप्राक्संस्थं वरुणायवरु
णपुरुषेभ्य॰ उत्तरस्यामुदक्संस्थं सोमायसोमपुरुषेभ्य॰ चक्रमध्येब्रह्मणेस्वा॰ तत्प्राच्यांब्रह्मपुरुषेभ्य॰ ब्रह्मणोदक्षिणतोविश्वे
भ्योदेवेभ्यो॰ ब्रम्हणः पश्चिमतः सर्वेभ्योभूतेभ्य॰ ब्रह्मणउत्तरतोदिवाचारिभ्य॰ चक्रादुत्तरतोरक्षोभ्य॰ हेतिदत्वापउपस्पृश्य
तदुत्तरतोभूमिंप्रोक्ष्यद्वितीयभूत यज्ञंकुर्यात् तत्रसूर्यपदस्थानेग्निपदंदिवापदस्थाने नक्तमितिविशेषः शेषंपूर्ववदिति भूतयज्ञः
अथपितृयज्ञः प्राचीनावीती आग्नेय्याभिमुखः सव्यंजान्वाच्योत्तर भागादंगुष्ठपर्वमात्रमन्नंगृहीत्वापराचीनपाणिनाचक्राद्दक्षि
णतः स्वधापितृभ्यइतिमंत्रेणबलिंदत्वापउपस्पृश्य द्वितीयचक्राग्नेयभागेचतथैवदत्वापउपस्पृश्य पितृयज्ञान्नशेषेणैवचक्राद्बहि
नैर्ऋत्यकोणे श्यामायस्वाहा चक्राद्वायव्यकोणेशबलायस्वाहेत्युभयत्रबलिंदत्वा गृहांगणेजलमासिच्य श्वचांडालपतितभू

तथापसेभ्योविकिरेत् येभूताः प्रचरंतिदिवानक्तंबलिमिच्छंतोविदुरस्यप्रेष्ठाः तेभ्योबलिंपुष्टिकामोहरामिमयिपुष्टिंपुष्टिपतिर्ददातुस्वाहा
रात्रौचेन्नक्तमितिब्रूयादितिशौनकोक्तश्वक्राकारप्रयोगः वृत्तिकृत्तुनराकारमंगीकृत्यवैलक्षण्यमाह तत्रसूर्यादिब्रह्मांतान् दशाब
लीन्प्राक्संस्थान्दत्वाकिंचिदंतरालंत्यक्त्वाभ्यइत्यादिवास्तुदेवताभ्य इत्यंतान्पंचबलीन्हुत्वाभ्योदक्षबलेः पश्चिमतइंद्रायतदुत्तरत
इंद्रपुरुषेभ्यः अंतरालदक्षिणतोयमाय तदुत्तरतोयमपुरुषेभ्यःब्रह्मणेदक्षबलेः प्राक्वरुणायतदुत्तरे वरुणपुरुषेभ्य अंतरालादु
त्तरतः सोमाय॰ सोमपुरुषेभ्यः अंतरालेब्रह्मणेतत्प्राक्ब्रह्मपुरुषेभ्यः विश्वेभ्योदेवेभ्यः सर्वेभ्योभूतेभ्यः दिवाचारिभ्यइत्युत्तरे र
क्षोभ्यः स्वाहेतिसर्वोत्तरतः ततोपसव्येनाग्नेय्यांस्वधापितृभ्यइतिपुरुषाकारोवैश्वदेवप्रयोगः अथमनुष्ययज्ञः मनुः अतिथिभ्यो
न्नदानंचनृ यज्ञः सतुपंचमः पुष्कलस्यप्रमाणान्नमन्यपात्रेसमुत्धरेत् अक्षतोदकहस्तेनचोपवीतीनिवेदयेत् योगिभ्यःसनकादि
भ्यइदंचान्नमितीतिचदद्यादन्नंतद्विप्रायकुर्याद्गृहबलिंतथा अन्नशुद्धिर्भवेदाशुत्यन्नदोषैर्नलिप्यते ब्राह्मणभोजनाशक्तौ परा
शरः नृयज्ञसिद्धयेदद्याद्भिक्षांसंकल्पपूर्विकां कूर्मपुराणेपि हंतकारमथाग्रंवाभिक्षांवा शक्तितोद्विजः दद्यादतिथयेनित्यंबुध्यात
परमेश्वरमिति भिक्षालक्षणमनुनोक्तं ग्रासमात्राभवेद्भिक्षा अग्रंग्रासचतुष्टयं अग्रंचतुर्गुणीकृत्यहंतकारोविधीयते एषप्रयो
गः अभ्यागतंब्राह्मणंप्राङ्मुखमुपवेश्यगंधादिनासंपूज्यनिवीती ब्राह्मणभोजन पर्याप्तमन्नंपात्रस्थं सनकादिमनुष्येभ्य इदम-

स्तनममेत्कृत्वा तेनान्नेनभोजयेत् तदभावेभिक्षान्नयंपूर्ववत्संकल्प्यभिक्षवेदद्यादितिमनुष्ययज्ञः यदिवैश्वदेवात्प्रागेवभिक्षुकेस
मागतेविशेषमाह गौतमः वैश्वदेवेतुसंप्राप्तेभिक्षुकेगृहमागते उद्धृत्यवैश्वदेवार्थंभिक्षांदत्वाविसर्जयेत् वैश्वदेवाकृतंपापंशक्तोभिक्षु
र्व्यपोहितुं नहिभिक्षुकृतान्दोषान्वैश्वदेवोव्यपोहति इयंचभिक्षास्वतंत्रफलार्था भिक्षादानप्रशंसामाहयमः सत्कृत्यभिक्षवेभिक्षां
यः प्रयच्छतिमानवः गोप्रदानसमंपुण्यं तस्याहभगवान्यमः भिक्षुकानाहयाज्ञवल्क्यः यतिश्चब्रह्मचारीचविद्यार्थीगुरुपोषकः अ
ध्वगः क्षीणवृत्तिश्चषडेतेभिक्षुकाः स्मृताः अतिथयश्चोक्तास्तेनैव शूद्रोवायदिचांडालः शत्रुर्वाब्रह्मघातकः आगतोवैश्वदेवांनेसो
तिथिः स्वर्गदायकः इति इतिपंचमहायज्ञाः एषामकरणेप्रायश्चित्तमाहव्यासः होमान्नदानरहितंनभोक्तव्यंकदाचन अकृत्वापंचयज्ञां
स्तु भुक्त्वाचांद्रायणंचरेत् यदिदैवामाध्यान्हिकंस्वेकालेनभवतिचेद्गौणकालेकार्यं गौणकालेप्यसंभवेप्रमः दिवोदितानिकर्माणिप्र-
मादादकृतानिचेत् शर्वर्याः प्रथमयामेतावत्कुर्याद्यथाक्रमं अत्रमुख्यकालानुरोधात्सायंसंध्योपासनमादौकृत्वागंतव्यमंतेनिवेशा-
दिति न्यायेनातीतकालंप्रातर्माध्यान्हिकंपश्चात्कार्यमितिन्यायतः प्राप्तंतस्यनिषेधार्थंयथाक्रममितिवचनं मरीचिरपि रात्रौप्रहरप
र्यंतंदिवाकर्माणिकारयेत् अवगाहंब्रह्मयज्ञंसौरजाप्यंनकारयेत् आश्वलायनेस्तुरात्रावपिब्रह्मयज्ञः कार्यः तस्यह्वावनध्यायोयदा
त्माशुचिर्यद्देशइतिस्मृत्रात् मध्यंदिनेप्रबलमधीयीतत्रयः एवंविद्वान्महारात्रेउषस्यदितेतथाग्रामेमनसास्वाध्यायमधीयीतदिवानक्तं

वेतिवृत्तावुक्तत्वाच्च विधुरस्यवैश्वदेवविशेषउक्तोवसिष्ठेन अनग्निकस्त्वयोविप्रः सोन्नंव्याहृतिभिः स्वयं हुत्वाशाकलमंत्रैस्तुशि
ष्टादन्नाद्बलिंहरेत् ॥ अथप्रयोगः पूर्ववदग्निस्थापनादिकृत्वान्नमादाय ॐ भूःस्वाहा अग्नयइदंनमम ॐ भुवः स्वाहावायवइदंनमम -
ॐ स्वः स्वाहासूर्यायेदंनमम ॐ भूर्भुवः स्वः स्वाहा प्रजापतयइदंनमम अथशाकलमंत्रास्तैत्तिरीयकारण्ये देवकृतस्यैनसोवयजन
मसिस्वाहा अग्नयइदं० ॥ मनुष्यकृतस्यैनसोवयजनमसिस्वाहा ॐ पितृकृतस्यैनसोवयजनमसिस्वाहा ॐ आत्मकृतस्यैनसोवय
जनमसिस्वाहा ॐ अन्यकृतस्यैनसोव० ॐ अस्मत्कृतस्यैनसोव० ॐ यत्स्वप्नश्चजाग्रतश्चैनश्चकृमतस्याव यद्विद्वांसश्चाविद्वांसश्चैन-
श्चकृमतस्याव० यत्स्वपंतश्चजाग्रतश्चैनश्चकृमतस्यावयजन० यद्विद्वांसश्चाविद्वांसश्चैनश्चकृमतस्याव० ॐ एनसएनसोवयजनमसि
स्वाहेत्येकादशाहुती हुत्वासर्वत्राप्यग्नयइदंनममेत्युद्देशत्यागौ पूर्ववत्कुर्यादिति ततोदेवंसंपूज्यनैवेद्यंप्रदर्श्यनित्यश्राद्धंकुर्या
त् तत्रषड्दैवतंविश्वेदेवहीनंदक्षिणापिंडावाहनस्वधाकाराग्नौकरणब्रह्मचर्यादिनियमरहितादिकार्यं तत्रदक्षिणादानेविकल्पः विक
ल्पविधायकंतुमत्कृतश्राद्धचंद्रिकायांद्रष्टव्यं देशकालौनिर्दिश्यास्मत्पितृपितामहप्रपितामहानाममुकशर्मणाममुकगोत्राणांवसु
रुद्रादित्यस्वरूपाणां सपत्नीकानां तथामातामहानां सपत्नीकानां नित्यश्राद्धंकरिष्य इतिसंकल्प्यांकल्प्य विप्रंनिमंत्र्यचंदनादिनासं
पूज्यपलाशादिपात्रेन्नंपरिविष्यगायत्र्याप्रोक्ष्यपृथिवीतेपात्रमित्यादिब्रह्मार्पणांतंकृत्वा ब्राह्मणंभोजयेत् शक्तोस्वपक्तोपित्रुद्देशेन

ब्राह्मणमात्रंभोजयेत् तदशक्तावपिकिंचिदन्नमुधृत्यै तदन्नंपिवृभ्यः स्वधानमइत्युक्त्वा ब्राह्मणायदद्यात् एतच्चनित्यं नित्यश्रा-
द्धाकरणे त्वर्चंतइतिदशधाजपोद्र्तिऋग्विधानेप्रायश्चित्त श्रवणात् अथभोजनविधिः आश्वलायनस्मृतौ अर्कपर्वद्वयेंरात्रौच
तुर्दश्य ष्टमीदिवा एकादश्यामहोरात्रं भुक्त्वाचांद्रायणंचरेदिति व्यासः पंचार्द्रोभोजनंकुर्यात्प्राङ्मुखोमौनमास्थितः हस्तौपा
दौतथैवास्यमेषुपंचार्द्रतामता हस्तौपादौप्रक्षाल्याचम्येत्यर्थः आश्वमेधिके आर्द्रपादस्तुभुंजीयात् प्राङ्मुख श्रासनेशुचौ पादाभ्यां
धरणींस्पृष्ट्वा पादेनैकेनवापुनरिति आसनेवर्ज्यानिप्रचेताः गोश्चकृन्मृन्मयंभिन्नंतथापालाशपिप्पलं लोह बद्धंसदैवार्कं वर्जयेदास-
नंबुधः ब्रह्मपुराणे उपलिप्तेसमेस्थानेशुचौश्लक्ष्णसमन्विते चतुरस्त्रंत्रिकोणंच वर्तुलंचार्धचंद्रकं कर्तव्यमानुपूर्व्येणब्राह्मणादि-
षुमंडलं हेमाद्रावत्रिः पंचाशत्पलिकंकांस्यंत्वधिकंभोजनायवै गृहस्थैस्तुसदाकार्यंमभावेरौप्यहेमयोः क्वचिन्निषेधमाह स्मृतिच
न्द्रिकायांप्रचेताः तांबूलाभ्यंजनेचैव कांस्यपात्रेच भोजनं यतिश्चब्रह्मचारीचविधवाचविवर्जयेत् इति अत्रदिङ्नियमः कौर्मे प्रा-
ङ्मुखोन्नानिभुंजीतेति आयुष्मान्प्राङ्मुखोभुंक्ते यशस्वीदक्षिणामुखः धनवान्पश्चिमायांतुधर्मवानुत्तरामुखः पुत्रवांस्तूत्तरा
मुखोनाश्नीयात् मनुः पुत्रवांस्तुगृहेनित्यंनाश्नीयादुत्तरामुखः सोमवारेतथाभ्यंगं वर्जयेत्तुसदाबुधइतिनिषेधात् अत्राभ्यंगपदात्सर्ष-
पादितैलाभ्यंगएवनिषिद्धोनतुतिलतैलाभ्यंगः तैलाभ्यंगनिषेधेतुतिलतैलंनिषिध्यते अभ्यंगस्यनिषेधेतु सार्षपादिनिषिध्यतइ-

ति मदनरत्नेप्रचेतोवाक्यात् जीवन्मातृपितृकस्तु दक्षिणामुखोपिनाश्नीयात् उक्तंचप्रयोगपारिजाते स्मृतिमंजर्यां पितरौजीवमानौचेन्नाश्नी
याद्दक्षिणामुखः तयोस्तुजीववानेकस्तथैवनियमःस्मृतइतिविज्ञानेश्वरश्च अनिशंमातृहीनानां यशस्यंदक्षिणामुखं भोजनमितिशेषः
सायंप्रातर्द्विजातीनां अशनंश्रुतिचोदितं नांतराभोजनंकार्यमग्निहोत्रसमोविधिः नचात्राग्निहोत्रसमोविधिरित्युक्तेः प्रातरेवभोजनंकार्यमि
तिवाच्यं दिवसस्यपंचमेतुभागेभोजनमाचरेदिति कात्यायनोक्तेः अतोत्रप्रातः शब्दोमाध्यान्हिकोत्तरकालपरः अथपरिवेषणंस्मृ
त्यंतरे शाकादीन्पुरतः स्थाप्य भक्ष्यंभोज्यं चवामतः अन्नंमध्येप्रतिष्ठाप्यदक्षिणेघृतपायसे ओदनेपरमान्नेच आज्यपात्रंयदिस्थितं-
तदाज्यंचभवेद्भक्ष्यं तदन्नंमांसमुच्यते घृतमपिभोजनात्प्रागेवग्राह्यंनतूच्छिष्टे नोच्छिष्टोघृतमादद्यादितिस्मृतिचंद्रिकाकारधृतविष्णुवा
क्यात् शातातपः हस्तदत्तानि-चान्नानिप्रत्यक्षंलवणंतथा मृत्तिकाभक्षणंचैवगोमांसाशनवत्स्मृतं प्रत्यक्षमपिलवणंहस्तदत्तनिषिद्धं
तथाचपैठीनसिः लवणंव्यंजनंचैवघृतंतैलंतथैवच लेह्यंपेयंचविविधंहस्तदत्तंनभक्षयेत् शूलपाणौभविष्ये सैंधवंलवणंयच्च यच्चसा
मुद्रिकंभवेत् पवित्रेपरमेह्येतेप्रत्यक्षेअपिनित्यशइति ब्रह्मपुराणे अन्नंदृष्ट्वाप्रणम्यादौ प्रांजलिःकारयेत्ततः अस्माकंनित्यमस्त्वेतदिति
भक्त्याथवंदयेत् पात्राद्ग्रासंसमुद्धृत्यसम्यक्पात्रांतरेक्षिपेत् जलमादायमंत्रेणगोग्रासंविनिवेदयेत् मंत्रस्तुप्रयोगेवक्ष्यते भूम्यपरि
शिष्टे आर्द्रपाणिराचांतः शुचौदेशेप्रत्यङ्मुखः प्राङ्मुखोवोपविश्यचतुरस्रमंडलेपात्रस्यमन्नं प्रणवव्याहृतिपूर्वयासावित्र्याभ्युक्ष्य-

स्वादोपितोमधोपितोइत्यभिमंत्र्य सत्यंत्वर्तेनपरिषिंचामीतिदिवापरिषिंचेदृतंत्वासत्येनपरिषिंचामीतिरात्रौदक्षिणतोभुवि भूतयेभुवनपतये
भूतानांपतयइति नमोंतैः प्राक्संस्थंप्रत्यक्संस्थंवाबलिंविकीर्य समाहितोमृतोपस्तरणमसीत्यपः प्राश्य सव्येनपाणिनापात्रमालभ्य तर्ज
नीमध्यमांगुष्ठैः प्राणायमध्यमानामिकांगुष्ठै रपानायानामिकाकनिष्ठांगुष्ठैर्व्यानायकनिष्ठतर्जन्यंगुष्ठैरुदानायसर्वांगुलिभिः समानाय
मुखे जुहुयात्सर्वाभिरेववासर्वेभ्योजुहुयादेवंवाग्यतोभूत्वामृतापिधानमसीत्यपिधानं प्राश्य शोधितमुखपादपाणिर्द्विराचमेदेवं-
भुंजानोग्निहोत्रफलमश्नुतेबलपुष्टिमासर्ववान्त्सर्वमायुरिति भविष्यपुराणेविशेषः भोजनात्किंचिदन्नाग्रं धर्मराजायवैबलिं दत्वाथ
चित्रगुप्तायप्रेतेभ्यश्चेदमुच्चरेत् प्रेतबलिमंत्रोप्यग्रेवक्ष्यते बल्युद्धरणंकार्यमित्युक्तंरामार्चनचंद्रिकायां भोजनादौबलिर्मुक्तः स
हिउद्धृत्य भोजनं अनुद्धृत्यतुयोभुंक्ते प्राणायामाष्टकंचरेत् स्मृत्यंतरे चित्राहुतीरनुद्धृत्ययोभुंक्तेग्रासपंचकं अघंसकेवलंभुंक्ते ज्ञा
नतोज्ञानतोपिवेति शौनकः स्वाहांताः प्रणवाद्याश्चनाम्नामंत्राश्चवायवइति आश्वमेधिके यथारसंनजानातिजिह्वाप्रणाहुतौनृपत
थासमाहितः कुर्यात्प्राणाहुतिमतंद्रितइति अपरार्केत्रिः मधुपर्केचसोमेच अप्सुप्राणाहुतौषुच   नोच्छिष्टस्यप्रवेदोषस्त्वत्रे-
श्चवचनंयथा विष्णुपुराणे प्राङ्मुखंपुरुषोश्नीयान्मध्येचकठिनाशनः अंतेपुनर्द्रवाशीतुबल्यारोग्येनमुंचति जठरंपूरयेदर्धमन्नैर्भा
गंजलस्यच वायोः संचरणार्थायचतुर्थमवशेषयेदिति आपस्तंबः अष्टौग्रासामुनेर्भक्ष्याः षोडशारण्यवासिनः द्वात्रिंशत्तुगृहस्थ

स्य त्यमितंब्रह्मचारिणः बौधायनः भोजनं हवनंदानंउपहारः प्रतिग्रहः बहिर्जानुनकार्याणि तद्वदाचमनंस्मृतं द्वस्थमनुः भोजनंतु
ननिःशेषंकुर्यात्प्राज्ञः कथंचन अन्यत्रदधिसक्ताज्यपललक्षीरमध्वपइति पललंतिलमिश्र ओदनः प्राणाहुतिग्रहणोत्तरंपात्रंयं
त्रादौस्थाप्यमित्याहव्यासः न्यस्तपात्रस्तभुंजीतपंचग्रासान्महामुने शेषमुद्धृत्य भोक्तव्यंपित्रर्थेनतुचोत्थरेदिति बृहस्पतिः नस्पृशे-
द्वामहस्तेनभुंजानोन्नंकदाचन नपादौनशिरोबस्तिंनपदाभोजनंस्पृशेदित्यादि निषेधास्त्वाचारमयूखादिषुद्रष्टव्याः पराशरः एक
पंक्त्युपविष्टानांविप्राणांसहभोजनं यद्येकोपित्यजेत्पात्रंशेषमन्नंनभोजयेत् पंक्तिभेदकान्याहबृहस्पतिः अग्निनाभस्मनाचैवस्तंभेनस
लिलेनवा द्वारेणैवचमार्गेणपंक्तिभेदोबुधैःस्मृतइति यमोपि उदकंचतृणंभस्म द्वारंपंथास्तथैवच एभिरंतरितंकृत्वापंक्तिदोषो
नविद्यतइति ग्रंथांतरे नृणांभोजनकालेतुयदिदीपो विनश्यति तदन्नंपाणिनास्पृष्ट्वा सावित्रींमनसास्मरेत् पुनर्दीपंततोलब्ध्वा
शेषंभुंजीतकामतः अन्यदन्नंनभोक्तव्यंभुक्त्वाचांद्रायणंचरेदिति देवलः भुक्त्वोच्छिष्टंसमाघ्रायसर्वस्माघृतवर्जितं उच्छिष्टभा
गधेयेभ्यः सोदकंनिर्वपेद्भुवि अमृतापिधानमसीत्यपः प्राश्यभुविक्षिपेत् उत्थायबहिरागत्यमुखहस्तादिशोधयेदिति सए
व आचम्यचततःकुर्यात्हस्तेकाष्ठस्यभक्षणं भोजनेदंतलग्नानिनिर्हृत्याचमनंचरेत् दंतलग्नमसंहार्यंलेपंमन्येतदंतवत् नतत्रब-
हुशःकुर्याद्यत्नमुद्धरणंप्रति अथप्रयोगः पाणिपादौप्रक्षाल्याचम्यश्रीपर्ण्यादिपीठेप्राङ्मुखः प्रत्यङ्मुखोवोपविश्य भूमिंप्रोक्ष्य

चतुरस्रमंडलंकृत्वातदुपरि हेमरूप्ययोरभावेद्विपंचाशत्पलपरिमितंकांस्यपात्रंनिधायपरिवेषणंकारयित्वातस्मादन्नाद्गोग्रासार्थमन्नंपृ
थक्कृत्वा सौरभेय्यः सर्वहिताः पवित्राःपुण्यराशयः प्रतिगृह्णंतुमेग्रासंगावस्त्रैलोक्यमातरइतिमंत्रेणगवेग्रासंदत्वाचम्यप्रां
जलिरन्नंप्रणम्यास्माकंनित्यमेतदस्तुइतिप्रार्थ्य ॐ भूर्भुवः स्वः तत्सवितुर्वरे॰ दित्यन्नमभ्युक्ष्य स्वादोपितोमधोपितोवयंत्वा
ववृमहे अस्माकमविताभवेत्यभिमंत्र्य सत्यंत्वर्तेनपरिषिंचामीतिदिवासत्रौ ऋतंत्वासत्येनपरिषिंचामीतिप्रदक्षिणमन्नं
परिषिच्यदक्षिणतोभ्युदक धारांप्राक्संस्थांकृत्वा तत्रभूपतयेनमः भुवनपतये॰ भूतानांपतये॰ धर्माय॰ चित्रगुप्तायनमः यत्रक्वच
नसंस्थानांक्षुत्तृष्णोपहतात्मनांप्रेतानां तृप्तयेक्षय्यमिदमस्तुयथासुखमिति प्रेतबलिंचेवंबलिषट्कंप्राक्संस्थंदत्वोपर्युदकंदत्वाब
लीनुद्धृत्यहस्तंप्रक्षाल्य आपोशनार्थंजलमादायवामहस्तमध्यमानामिकांगुष्ठेर्भोजनपात्रमालभ्यान्नंब्रह्मेतिध्यात्वा समाहितोमृ
तोपस्तरणमसीतिनिःशब्दंपीत्वाघृताक्तमन्नंपूर्वोक्ततत्तदंगुलिभिः सर्वाभिर्वास्येपंचप्राणाहुतीर्जुहुयात् तत्रमंत्राः ॐ प्राणाय
स्वाहा प्राणायेदंनमम ॐ अपानायस्वाहा अपानायेदंनमम ॐ व्यानायस्वाहा व्यानायेदंनमम ॐ उदानायस्वा॰ उदानायेदं
नमम ॐ समानायस्वा॰ समानायेदंनमम ॐ ब्रह्मणेस्वाहा ब्रह्मणेदंनमम ततोजलंस्पृष्ट्वा यथेष्टंलौकिकवाक्यान्यनुच्चा
रयन्कवलेकवलेइष्टदेवतांस्मृत्वाभोजनंकुर्यात् एतच्चभोजनंरहसिकार्यं तथाच स्मृतिचंद्रिकायांदेवलः आहारंतुरहःकुर्यान्नि

हारंचैवसर्वदा गुप्ताभ्यांलक्ष्मीयुक्तः स्यात्याकाश्येहीयनेश्रियेति ततोभोजनांतेपात्रस्थमन्नं किंचिद्गृहीत्वाप्राय भूमौ विसृज्य तत्रमंत्रः अ
स्मत्कुलेमृतायेचपितृलोकविवर्जिताः भुंजंतुममचोच्छिष्टं पात्राच्चैवंफलविक्षिपेत् उत्तरापोशनार्थंजलमादाया मृतापिधानमसी त्यर्धंपीत्वा
र्धंरौरवेपूयनिलयेपद्मार्बुदनिवासिनां अर्थिनामुदकंदत्तमक्षय्यमुपतिष्ठत्विति मंत्रेणपितृतीर्थेन भूमौनिषिच्यांगणादावागत्यमृद्भिरद्भिः
पाणिमुखेसंशोध्यषोडशगंडूषान्कृत्वादंतकाष्ठेनदंतान्संशोध्य हस्तौपादौप्रक्षाल्य भोजनपात्रप्रक्षालनं तद्देशमार्जनं कारयित्वा चम्या–
ध्यायस्वेतिफलमन्नमनुमंत्र्यप्रणवेनात्मानंब्रह्मणिसंयोज्यजलेनहस्तौनिघृष्य तज्जलमंगुष्ठाभ्यां अक्ष्णोर्निषिंचेत् तत्रमंत्रः शर्यातिंचसु
कन्यांचच्यवनंशक्रमश्विनौ फलमात्रः स्मरेद्यस्तु चक्षुस्तस्यनहीयतइति ततः शतपदानिगत्वास्वासनेउपविश्य अगस्तिरग्निर्वडवान
लश्चफलंमयान्नं जरयत्वशेषं सुखंममैतत्परिणामसंभवंयच्छत्वरोगंममचास्तुदेहे इत्युदरंपरिमृज्य तांबूलंभक्षयेत् अथतांबूलभक्षण–
माहमार्कंडेयः भूयोप्याचम्यकर्तव्यंततस्तांबूलभक्षणं वसिष्ठः सुपूगंचसुपत्रंचचूर्णेनचसमन्वितं दत्वातुद्विजदेवेभ्यस्तांबूलंचर्वयेद्द्वि
जः पर्णमूले भवेद्व्याधिः पर्णाग्रेपापसंभवः चूर्णपत्रंक्षिपेदायुः शिराबुद्धिविनाशिनी तस्मादग्रंचमूलंचशिरांचैवविशेषतः चूर्णपत्रंव
र्जयित्वातांबूलंखादयेद्बुधेति इतिश्रीभारद्वाजमहादेवभट्टात्मजदिवाकरकृते आचारार्केपंचमभागकृत्यं वेणुसंभवनिनादमोहितागो
पिकास्तटमुपेत्ययामुनं येनसार्धमरमंतसंभ्रमात्तंभजामिवसुदेवनंदनं १ अथषष्ठांदिभागकृत्यं दक्षः इतिहासपुराणाद्यैः षष्ठसम

मर्कोनयेत् अष्टमेलोकयात्रानुबहिः संध्याननः पुनः यमः रवेरस्तमयात्पूर्वंघटिकैकायदाभवेत् सायंसंध्यामुपासीतकुर्यात्स्थोमंचपूर्ववत्-
सायंसंध्यायांविशेषोलिख्यते शौनकः अग्निश्चेत्यनुवाकेनसायंसंध्यापिबेदपः इदंमंत्राचमनं अथार्घ्यदानं तच्च प्रातस्तिष्ठन्नर्घ्यदानं
सायंतूपविशन्भवि इतियमवाक्यात्सायंसंध्यायामुपविश्यैवकेचिदर्घ्यदानं कार्यमित्याहुस्तच्चिंत्यं जलमंजलिनादाय गायत्र्याचाभिमं-
त्रितं दद्यादर्घ्यत्रयंस्तिष्ठंस्त्रिषुकालेषुबद्धृच इत्याश्वलायनस्मृतेः पाणिभ्यां जलमादायगायत्र्याचाभिमंत्रितं रवेरभिमुखंस्तिष्ठंस्त्रि
रूर्ध्वंसंध्ययोः क्षिपेदितिशौनकोक्तेश्च गृह्यपरिशिष्टेपि अथाचम्यदर्भपाणिः पूर्णमुदकांजलिमुद्धृत्यादित्याभिमुखः स्थित्वाप्रण
वव्याहृतिपूर्वयासावित्र्यात्रिरर्घ्यंनिवेद्य क्षिपेदिति श्रीमातामहचरणानांपूर्ववत्त्रिरर्घ्यं दत्वेतिवदतामयमेवाशयः प्रयोग
पारिजातादयः सर्ववाजिपेययाजिनश्चैवमेवाहुः जपेविशेषः कारिकायां अर्धास्तमय आदित्ये पश्चिमस्ययउत्तरः भागस्तन्मुखआसी
नः सावित्रींवाग्यतोजपेदितिउत्तरप्रतीच्याअष्टमोभाग इत्यर्थः दिशोष्टधाविभक्तायाः प्रतीच्याभागसप्तकंहित्वादक्षिणतोन्यस्तु योष्टमो भा
गउत्तरः अस्याभिमुखतोविप्रोभूत्वाप्रयतमानसः जपन्नासीतसावित्रीं संध्यांकृत्स्नमतंद्रित इतिशौनकोक्तेः उपस्थानेविशेषः शौनके-
इमंमेवरुणेत्यादिसायंकालेविशेषतइति व्यासोपि जपेद्वारुणमंत्रांस्तु इमंमेवरुणादिकान् चतुर्मंत्रान्विशेषज्ञः संध्याफलमवाप्नुयादि
ति अथप्रयोगः तत्रहस्तौपादौप्रक्षाल्यद्विराचम्य प्राणानायम्यममभ० सायंसंध्यामुपासिष्यइति पूर्ववत्प्रथममार्जनंकृत्वा जलमा

दाय अग्निश्चेत्यनुवाकस्ययाज्ञवल्क्युपनिषदृषिः अग्निमामन्यु मन्युपत्यहानिर्देवताः गायत्रीपंक्तिर्विराट्छंदांसि मंत्राचमनेवि०-
ॐ अग्निश्चमामन्युश्चम न्युपतयश्चमन्युकृतेभ्यः पापेभ्योरक्षंतां यदन्हापापमकार्षं मनसावाचाहस्ताभ्यां पद्भ्यामुदरेणशिश्ना अ
हस्तद वलुंपतु यत्किंचदुरितंमयि इदमहंमाममृतयोनौ सत्येज्योतिषिजुहोमिस्वाहेति पीत्वा पूर्ववद्द्विराचम्यद्वितीयतृतीयचतुर्थमा
र्जनाद्यघमर्षणांतं कृत्वा पश्चिमाभिमुखस्तिष्ठन्पाणिभ्यांजलमादायसावित्र्याभिमंत्र्य श्रीसवित्रइदमर्घ्यंसमर्पयामीतित्रिरर्घ्यंदद्यात् त
तोसावादित्योब्रह्मेत्यादि गायत्रीजपसंकल्पां तंकृत्वावायव्यलग्नपश्चिमाभिमुखो भूत्वाहृत्स्थांहृत्स्थादित्यमंडलमध्यस्थांश्यामां श्या
मांबरानुलेपनस्रगाभरणामेकवक्त्रां शंखचक्रगदापद्मांक चतुर्भुजां गरुडासनारूढां विष्णुदैवत्यांसामवेदमुदाहरंतीस्वर्लोकाधिष्ठा
त्रींसरस्वतींनामदेवतां ध्यात्वा मनसासंपूज्ययथाशक्तिजपेत् ततउपस्थानंकुर्यात् तद्यथा इमंमेवरुण तत्वायामीत्यृचो राजीगर्त्त
शुनःशेपऋषिः वरुणोदेवता आद्यागायत्रीद्वितीयात्रिष्टुप् वरुणोपस्थानेविनियोगः ॐ इमंमेवरुणश्रुधीहवमद्याचमृळया त्वाम
वस्युराचके ॐ तत्वायामिब्रह्मणा वंदमानस्तदाशास्ते यजमानोहविर्भिः अहेळमानोवरुणेहबोध्युरुशंसमानआयुःप्रमोषीः जात
वेदसइत्यादिपूर्ववदभिसायंसंध्यां अथसायमौपासनंपूर्वोक्तं ब्रह्मचारीत्वग्निकार्यंकुर्यात् अग्निकार्यंततः कुर्यात्संध्ययोरुभयोरपी-
तियोगियाज्ञवल्क्ये सायंप्रातश्चाग्निमिंधानेत्येकइतिलौगाक्षिसूत्रैः तच्चेत्थं आचम्यतिथ्याद्यनुकीर्त्यममऽ० मातरग्निका र्यंकरिष्य इति

संकल्पः प्रातः सायंतुसायमग्निकार्यंकरिष्यइति संकल्प्याग्न्यावाहनादिपूजनांतंकृत्वाप्रादेशमात्रांसमिधंगृहीत्वा ऽ ग्नयेसमिधमाहार्षं बृहतेजातवेदसे तयात्वमग्नेवर्धस्वसमिधाब्रह्मणावयंस्वाहेति जुहुयात् अग्नयइदंनममेतित्यजेत् ततआर्द्रपाणिनलमग्नौप्रता- प्य ॐ तेजसामासमनज्मीतिसंवृतौष्ठद्वयंमुखमवाङ्गि मृज्यपाणिंप्रक्षाल्य पुनर्द्विवारमेवंकृत्वातिष्ठन्नग्निमुपतिष्ठेत् तत्रमंत्राः- मयिमेधांमयिप्रजांमय्यग्निस्तेजोदधातु मयिमेधांमयिप्रजांमयींद्रइंद्रियंदधातु मयिमेधांमयिप्रजांमयिसूर्योभ्राजोदधातु यत्ते अग्नेतेजस्तेनाहंतेजस्वीभूयासं यत्तेअग्नेवर्चस्तेनाहंवर्चस्वीभूयासं यत्तेअग्नेहरस्तेनाहंहरस्वीभूयास मेभिरुपस्थायविभूतिंधृ- त्वा आंगिरसबार्हस्पत्यभारद्वाजेतित्रिप्रवरान्वितभारद्वाजगोत्रोत्पन्नोहंतोभदेवशर्माभोअग्नेत्वामभिवादये एवंस्वस्वप्रवराद्युच्चा- र्याभिवादयेदित्यग्निकार्यं अथदीपकालमाह मरीचिः रवेरस्तंसमारभ्ययावत्सूर्योदयोभवेत् यस्य तिष्ठेद्गृहेदीपस्तस्यनास्ति दरिद्रता आयुर्दः प्राङ्मुखोदीपोधनदःस्यादुदङ्मुखः प्रत्यङ्मुखोदुःखदोसौहानिदोदक्षिणामुखइति प्रत्यङ्मुखनिषेधस्तुकार्य- कारिनित्यदीपविषयएव श्रीकार्तवीर्यादिदीपः प्रत्यङ्मुखएवस्थाप्यः ततोदेवंसंपूज्य द्वितीयभोजनंकृत्वापुस्तकादिदर्शनेन शर्वरी प्रथमभागंनीत्वास्वपेत् अथस्वापविधिर्मात्स्ये शुचिंदेशंविविक्तंतुगोमयेनोपलेपयेत् वैदिकैर्गारुडैर्मंत्रैरभिमंत्र्यस्वपेत्ततः मं- गल्यंपूर्णकुंभंचशिरस्थानेनिधापयेत् रात्रिसूक्तंजपन्रात्रौरात्रिस्वामोभवेन्नरः स्कांदे उपानहौवैणवंदंडमंबुपात्रंतथैवच

तांबूलादीनिसर्वाणिसमीपेस्थापयेद्गृही नस्वपेदित्यनुवृत्तौ मार्कंडेयः नार्द्रवासाश्चनग्नश्चनोत्तरापरमस्तकः नाकाशेसर्वतःशून्येन
चनैत्यद्रुमेतथेति स्वापकालेविष्णुंनमस्कृत्यस्वापंकुर्वीत रात्रिसूक्तंजपन्स्मृत्वा देवांश्चसुखशायिनः नमस्कृत्वाव्ययंविष्णुंसमाधि
स्थंस्वपेन्निशि इतिचंद्रिकाकारधृतपुराणात् सुखशायिनोगस्त्यादीन् विष्णुपुराणे प्राच्यांदिशिशिरःशस्तंयाम्यायामथवानृप
सदैवस्वपतःपुंसोविपरीतंतुरोगदमिति आश्वलायनः पत्नीमृतुमतींस्निग्धांतृप्तांभोगविवर्जितां उपेयान्मध्यरात्रेंतेजीर्णेन्नेवसम
मानसइति यमः पूर्वरात्रेव्यतीतेतुसगच्छेद्रतिमंदिरं पादौप्रक्षालयेत्पूर्वंपश्चाच्छय्यांसमाविशेत् धौतवस्त्रंचतांबूलंसंयोगेचशुभाव
हं शय्याचोक्ता शिल्पशास्त्रे चतुराशीतिपर्वाणिदैर्घ्येणपरिकल्पयेत् षष्ठ्यंगुलानिविस्तारंमंचकंहस्तसंमितं एवंशय्याविधान
आसर्वेषांशयनोचिता मानाधिक्येदरिद्रःस्यान्मानहीनेसुखक्षय इति स्मृतिचंद्रिकायांविष्णुपुराणेपि नविशालांनवाभग्नांनास
मांमलिनांनच नचजंतुमयींशय्यामधितिष्ठेदनास्तृतामिति पर्यंकोप्युक्तस्तत्रैव आयामः सप्ततालःस्याच्चतुस्तालंतुविस्तृतं
द्वितालमुन्नतंज्ञेय मेतत्पर्यंकलक्षणं तालादिप्रमाणंचोक्तंप्रयोगरत्नेस्मृत्यंतरे अंगुष्ठादिकनिष्ठांतंभवेन्मानचतुष्टयं प्रादे
शस्तालगोकर्णवितस्तिस्तुयथाक्रममिति अथस्त्रीकृत्यमाहयज्ञः भर्तुःपादौनमस्कृत्यपश्चाच्छय्यांसमाविशेत् अथरत-
तिः संस्मृत्यपरमात्मानं पत्न्याजंघेप्रसारयेत् योनिंस्पृष्ट्वाजपेत्सूक्तंविष्णुर्योनिंप्रजापतेः. रेतः सिंचेत्ततोयोन्यांतस्माद्गर्भो

मर्तिसेति याज्ञवल्क्यः षोडशर्तुनिशास्त्रीणांतस्मिन्युग्मासुसंविशेत् यथाकामीभवेद्वापिस्त्रीणांवरमनुस्मरन् मनुः तासामाद्याश्चत
स्रस्तुनिंदितैकादशीतथा त्रयोदशीचशेषास्तुप्रशस्तास्त्वत्ररात्रयः अमावास्याष्टमीचैवपौर्णमासीचतुर्दशी ब्रह्मचारीभवेन्नित्यमप्यृ
तौस्नानकोद्विजइत्यादिनिषेधाःमयूखादिषुद्रष्टव्याः स्मृत्यर्थसारे ऋतौतुमैथुनेस्नायाद्गर्भसंभूतिशंकया अनृतौनतदभावाच्चशौचं
त्रिमूत्रवच्चरेत् तत्रऋतुदर्शनमारभ्यषोडशदिवसेष्वाद्यदिनचतुष्टयमेकादशंत्रयोदशंचविहायावशिष्टेषुदिवसेषुपुत्रार्थीयुग्मादिवसे
कन्यार्थ्ययुग्मदिने चतुर्थीषष्ठ्यष्टमीचतुर्दशीपंचदशीश्राद्धात्पूर्वदिनव्रतोपवासश्राद्धनिमंत्रितनदुक्तशनिरविभौमवार भ
रणीकृत्तिकार्द्रामघापूर्वाफल्गुनी विशाखाज्येष्ठामूलपूर्वाषाढा पूर्वाभाद्रपदा त्रिजन्मनक्षत्र संक्रांतिव्यतीपात वैधृती व्यतिरिक्तेश
य्यांतरेउपवीतीमन्मथगृहंस्पृष्ट्वा विष्णुर्योनिमिति जपित्वाईश्वरंस्मृत्वोपेत्योत्थायस्नायात् अनृतौतुपूर्वोक्तं शौचंकुर्यात् एवंयथायो
गंसुखः सन्स्वशय्यायांयथासुखंप्रबोधपर्यंतंस्वपित्वापुनःप्रभातेउत्थायप्रातः स्मरणादीनिकर्माणि प्रतिदिनंकुर्यात् एतेषामक
रणेप्रत्यवायःस्मृत्यर्थसारे नास्तिक्यात्कर्महानौतुमासेनपतितःस्मृतः द्वादशाब्दव्रतेनैव तस्यशुद्धिस्तुनान्यथा तन्निरीक्ष्यार्कमीक्षेत-
स्पर्शेस्नायात्सचैलकं तेनचसहयोहास्यंकुर्वन्भवेन्नतत्समः तदन्नंभुक्त्वासद्यस्तुससर्पेगहनेवने आश्वलायनः बह्वल्पंवास्वगृ-
ह्योक्तं यस्यकर्मप्रकीर्तितं तस्यतावतिशास्त्रार्थेकृतेसर्वःकृतोभवेदिति कूर्मपुराणे इत्येतदखिलंप्रोक्तं महन्यहनिवैमयाब्राह्म

णानांकर्म जातमपवर्गफलप्रदं नास्तिक्याद्थवालस्या ह्राह्मणोनकरोतियः सयातिनरकान्घोरान्कालयोनौप्रजायते नान्योविमु
क्तयेपंथामुक्त्वाश्रमविधिंस्वकंतस्मात्कर्माणि कुर्वंति तुष्टयेपरमेष्ठिनइति निर्णयसिंधावत्रिः सप्तमासाधिकेगर्भेवर्धमानेतुगर्भणी
वर्जनीयाप्रयत्नेनदैवेपित्र्येचकर्मणि ॥१॥ सप्तमासाधिकेगर्भेगर्भिण्यायत्समर्पितं॥हव्यंदेवानगृह्णंति कव्यंचपितरस्तथा ॥२॥स
प्त.यदिपच्यते अन्यगोत्रेनभोक्तव्यमापद्यपिनकर्हिचित् ॥३॥ सप्त.यदिपच्यते ॥ तद्गृहंभिक्षुणात्याज्यंनियमेनात्मवान्मुनि
रिति ॥४॥ ॥अथगर्भिणीहस्तभोजननिषेधः॥ ॥ षष्ठेमासेतुसंप्राप्तेगर्भिण्याश्चैवहस्ततः ॥ नभोक्तव्यंविशेषेणइतिशाता
तपोब्रवीत् ॥५॥ नारदसंहितायां ॥ द्विजस्यधर्मपत्नीतुअंतर्वत्नीयदाभवेत्पंचमेनिर्गतेमासि तस्याहस्तेनभोजनं ॥ नकुर्यादितिशे
षः ॥६॥ शिवसंहितायांशिवः ॥गर्भिणीतुयदाभार्याविप्रादीनांविशेषतः ॥तासांहस्तेनभोक्तव्यं कृत्वाचांद्रायणंचरेत् ॥मासेषष्ठे
सप्तमेवाष्टमेवाप्रासेपत्न्यानैवकुर्यात्कदाचित् ॥ होमंयानंदेवयात्रांतथैवतस्याहस्तेनाशनंविप्रहानिं ॥ गोभिलः ॥ योविप्रःकृत
नित्यस्तुसमर्वान्कृतवान्मखान् सस्नातःसर्वतीर्थेषुतप्तंतेनाखिलंतपः कौर्मे नैत्यकेनास्त्यनध्यायः संध्योपासनएवच उपाकर्म
णिचोत्सर्गेहोममंत्रेषुचैवहि. तथा नानध्यायेजपेद्वेदान्रुद्रांश्चैवविशेषतः पौरुषंपावमानंचगृहीतनियमाद्दतइति हारीतः अनु
ष्ठितंतुयद्देवैर्मुनिभिर्यदनुष्ठितं नानुष्ठेयंमनुष्यैस्तत्तदुक्तंकर्मचाचरेदितिदिक् उक्तंनात्रमयास्वयंस्वचरितंयद्याज्ञवल्क्यादिभिःभो

कं धर्मविनिर्णयेतदखिलंस्पष्टंपरिज्ञसये संदिष्टंगुरुदत्तमंत्ररूपयाशार्दूलविक्रीडितंतेनश्रीरविमंडलांतरगतोनारायणः प्रीयतां
इतिश्रीमद्भारद्वाजमहादेवभट्टात्मजसकलविद्यानिधानदिवाकरकृते आचारार्केष्टमभागकृत्यं यत्पादपंकजपरागपवित्र
देहाहित्वाकलेवरमिदं किलदार्षदंसी जग्राहगौतमवधूः कमनीयरूपं तंजानकीपतिमजं मनसास्मरामि ॥ ॥ इति-
आचारार्कः समाप्तः ॥ ५ ॥ ॥ श्रीलक्ष्मीनृसिंहप्रसन्न ॥ ॥ ५ ॥ ५ ॥ ॥
पुणें पेठ शनवार मेहुणपुरा येथे "जगद्धितेच्छु" छापखान्यात छापिल शके १७८८ क्षयनामसंवत्सरे आश्वीनकृष्ण द्वादशी रवि
वार दिने समाप्तः ॥ ५ ॥ ॥ ५ ॥ ५ ॥ ॥ ५ ॥ ॥ ५

इति आचारार्क समाप्तोयम्